# sA NkhyakArikA with gauDapAdabhAShya

# સાઙ્ખ્યકારિકા ગૌડપાદભાષ્યસહિતા

## Document Information

Text title : sAMkhyakArikAgauDapAdabhASya

File name : sAMkhyakArikAgauDapAdabhASya.itx

Category : major_works

Location : doc_z_misc_major_works

Transliterated by : Dhaval Patel drdhaval2785 at gmail.com

Proofread by : Dhaval Patel drdhaval2785 at gmail.com

Latest update : September 15, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# સાઙ્ખ્યકારિકા ગૌડપાદભાષ્યસહિતા

દુઃખત્રયાભિઘાતાજ્જિજ્ઞાસા તદભિઘાતકે હેતૌ ।
દૃષ્ટે સાપાર્થા ચેન્નૈકાન્તાત્યન્તતોઽભાવાત્ ॥ ૧॥

ગૌડપાદભાષ્ય

કપિલાય નમસ્તસ્મૈ યેનાવિદ્યોદધૌ જગતિ મગ્ને ।
કારુણ્યાત્સાઙ્ખ્યમયી નૌરિવ વિહિતા પ્રતરણાય ॥

અલ્પગ્રન્થં સ્પષ્ટં પ્રમાણસિદ્ધાન્તહેતુભિર્યુક્તમ્ ।
શાસ્ત્રં શિષ્યહિતાય સમાસતોઽહં પ્રવક્ષ્યામિ ॥

દુઃખત્રયેતિ । અસ્યા આર્ય્યાયા ઉપોદ્ઘાતઃ ક્રિયતે । ઇહ ભગવાન્બ્રહ્મસુતઃ
કપિલો નામ । તદ્યથા -
સનકશ્ચ સનન્દશ્ચ તૃતીયશ્ચ સનાતનઃ ।
આસુરિઃ કપિલશ્ચૈવ વોઢુઃ પઞ્ચશિખસ્તથા ।
ઇત્યેતે બ્રહ્મણઃ પુત્રાઃ સપ્ત પ્રોક્તા મહર્ષયઃ ॥

કપિલસ્ય સહોત્પન્ના ધર્મો જ્ઞાનં વૈરાગ્યમૈશ્વર્ય્યઞ્ચેતિ । એવં સ
ઉત્પન્નઃ સન્નન્ધતમસિ મજ્જજ્જગદાલોક્ય સંસારપારમ્પર્ય્યેણ સત્કારુણ્યો
જિજ્ઞાસમાનાય આસુરિસગોત્રાય બ્રહ્મણાયેદં પઞ્ચવિંશતિતત્ત્વાનાં
જ્ઞાનમુક્તવાન્ । યસ્ય જ્ઞાનાદ્દુઃખક્ષયો ભવતિ ।
પઞ્ચવિંશતિતત્વજ્ઞો યત્ર તત્રાશ્રમે વસેત્ ।
જટી મુણ્ડી શિખી વાપિ મુચ્યતે નાત્ર સંશયઃ ॥

તદિદમાહુઃ । દુઃખત્રયાભિઘાતાજ્જિજ્ઞાસેતિ । તત્ર
દુઃખત્રયં- આધ્યાત્મિકં આધિભૌતિકં આધિદૈવિકં ચેતિ ।
તત્રાધ્યાત્મિકં દ્વિવિધં - શારીરં માનસં ચેતિ । શારીરં
વાતપિત્તશ્લેષ્મવિપર્ય્યયકૃતં જ્વરાતીસારાદિ । માનસં
પ્રિયવિયોગાપ્રિયસંયોગાદિ । આધિભૌતિકં ચતુર્વિધં - ભૂતગ્રામનિમિત્તં

મનુષ્યપશુમૃગપક્ષિસરીસૃપદંશમશકયૂકામત્કુણમત્સ્યમકરગ્રાહસ્થાવરેભ્યો જરાયુજાણ્ડજસ્વેદજોદ્ભિજ્જેભ્યઃ સકાશાદુપજાયતે । આધિદૈવિકં - દેવાનામિદં દૈવિકમ્ । દિવઃ પ્રભવતીતિ વા દૈવં તદધિકૃત્ય યદુપજાયતે શીતોષ્ણવાતવર્ષાશનિપાતાદિકમ્ । એવં યથા દુઃખત્રયાભિઘાતાજ્જિજ્ઞાસા કાર્યા ક્વ । તદભિઘાતકે હેતૌ । તસ્ય દુઃખત્રયસ્ય અભિઘાતકો યોઽસૌ હેતુસ્તત્રેતિ । દૃષ્ટે સાપાર્થા ચેત્ । દૃષ્ટે હેતૌ દુઃખત્રયાભિઘાતકે સા જિજ્ઞાસાઽપાર્થા ચેદ્યદિ । તત્રાધ્યાત્મિકસ્ય દ્વિવિધસ્યાપિ આયુર્વેદશાસ્ત્રક્રિયયા પ્રિયસમાગમાપ્રિયપરિહારકટુતિક્તકષાયાદિક્વાથાદિભિર્દૃષ્ટ એવ આધ્યાત્મિકોપાયઃ । આધિભૌતિકસ્ય રક્ષાદિનાઽભિઘાતો દૃષ્ટઃ । દૃષ્ટે સાઽપાર્થા ચેદેવં મન્યસે । ન । એકાન્ત્યાત્યન્તતોઽભાવાત્ । યત એકાન્તતોઽવશ્યં અત્યન્તતો નિત્યં દૃષ્ટેન હેતુનાઽભિઘાતો ન ભવતિ તસ્માદન્યત્ર એકાન્તાત્યન્તાભિઘાતકે હેતૌ જિજ્ઞાસા વિવિદિષા કાર્યેતિ ।

દૃષ્ટવદાનુશ્રવિકઃ સ હ્યવિશુદ્ધિક્ષયાતિશયયુક્તઃ ।
તદ્વિપરીતઃ શ્રેયાન્ વ્યક્તાવ્યક્તજ્ઞવિજ્ઞાનાત્ ॥ ૨॥

ગૌડપાદભાષ્ય

યદિ દૃષ્ટાન્યત્ર જિજ્ઞાસા કાર્યા તતોઽપિ નૈવ યત આનુશ્રવિકો હેતુર્દુઃખત્રયાભિઘાતકઃ । અનુશ્રવતીત્યનુશ્રવસ્તત્રભવઃ આનુશ્રવિકઃ સ ચ આગમાત્સિદ્ધઃ । યથા
અપામ સોમમમૃતા અભૂમાગન્મ જ્યોતિરવિદામ દેવાન્ ।
કિન્નૂનમસ્માન્ કૃણવદરાતિઃ કિમુ ધૂર્ત્તિરમૃતમર્ત્યસ્ય ॥

કદાચિદિન્દ્રાદીનાં દેવાનાં કલ્પ આસીત્ । કથં વયમમૃતા અભૂમેતિ વિચાર્યામું યસ્માદ્વયમપામ સોમં પીતવન્તઃ સોમં તસ્માદમૃતા અભૂમ અમરા ભૂતવન્ત ઇત્યર્થઃ કિંચ અગન્મ જ્યોતિઃ ગતવતો લબ્ધવતો જ્યોતિઃ સ્વર્ગમિતિ । અવિદામ દેવાન્ દિવ્યાન્ વિદિતવન્તઃ । એવં ચ કિન્નૂનમસ્માન્ કૃણવદરાતિઃ નૂનં નિશ્ચિતં કિં અરાતિઃ શત્રુરસ્માન્ કૃણવત્ કર્ત્તેતિ કિમુ ધૂર્ત્તિરમૃતમર્ત્યસ્ય ધૂર્ત્તિર્જરા હિંસા વા કિં કરિષ્યતિ અમૃતમર્ત્યસ્ય । અન્યચ્ચ શ્રૂયતે આત્યન્તિકં ફલં પશુવધેન । સર્વાંલ્લોકાઞ્જયતિ મૃત્યું તરતિ પાપ્માનં તરતિ બ્રહ્મહત્યાં તરતિ યો યોઽશ્વમેધેન યજત ઇતિ । એકાન્તાત્યન્તિકે એવ વેદોક્તે અપાર્થેઽવજિજ્ઞાસા

ઇતિ ન । ઉચ્યતે । દૃષ્ટવદાનુશ્રવિક ઇતિ દૃષ્ટેન તુલ્યો દૃષ્ટવત્ ।
કોઽસૌ આનુશ્રવિકઃ કસ્માત્સ યસ્માદવિશુદ્ધિક્ષયાતિશયયુક્તઃ ।
અવિશુદ્ધિયુક્તઃ પશુઘાતાત્ તથા ચોક્તમ્ ।
ષટ્ શતાનિ નિયુજ્યન્તે પશુનાં મધ્યમેઽહનિ ।
અશ્વમેધસ્ય વચનાદૂનાનિ પશુભિસ્ત્રિભિઃ ॥

યદ્યપિ શ્રુતિસ્મૃતિવિહિતો ધર્મસ્તથાપિ મિશ્રીભાવાદવિશુદ્ધિયુક્ત ઇતિ ।
યથા
બહૂનીન્દ્રસહસ્રાણિ દેવાનાં ચ યુગે યુગે ।
કાલેન સમતીતાનિ કાલો હિ દુરતિક્રમઃ ॥

એવમિન્દ્રાદિનાશાત્ક્ષયયુક્તઃ । તથાઽતિશયો વિશેષસ્તેન યુક્તઃ ।
વિશેષગુણાદર્શનાદિતરસ્ય દુઃખં સ્યાદિતિ । એવમાનુશ્રવિકોઽપિ
હેતુર્દૃષ્ટવત્ । કસ્તર્હિ શ્રેયાનિતિ ચેત્ । ઉચ્યતે । તદ્વિપરીતઃ
શ્રેયાન્ તાભ્યાં દૃષ્ટાનુશ્રવિકાભ્યાં વિપરીતઃ શ્રેયાન્ પ્રશસ્યતર ઇતિ ।
અવિશુદ્ધિક્ષયાતિશયાયુક્તત્વાત્ । સ કથમિત્યાહ । વ્યક્તાવ્યક્તજ્ઞવિજ્ઞાનાત્
તત્ર વ્યક્તં મહદાદિબુદ્ધિરહંકારઃ પઞ્ચ તન્માત્રાણિ એકાદશેન્દ્રિયાણિ
પઞ્ચમહાભૂતાનિ । અવ્યક્તં પ્રધાનમ્ । જ્ઞઃ પુરુષઃ । એવમેતાનિ
પઞ્ચવિંશતિતત્ત્વાનિ વ્યક્તાવ્યક્તજ્ઞાનિ કથ્યન્તે એતદ્વિજ્ઞાનાચ્છ્રેય
ઇત્યુક્તં ચ પઞ્ચવિંશતિતત્ત્વજ્ઞ ઇતિ । અથ વ્યક્તાવ્યક્તજ્ઞાનાં કો
વિશેષ ઇત્યુચ્યતે ।

મૂલપ્રકૃતિરવિકૃતિર્મહદાદ્યાઃ પ્રકૃતિવિકૃતયઃ સપ્ત ।
ષોડશકસ્તુ વિકારો ન પ્રકૃતિર્ન વિકૃતિઃ પુરુષઃ ॥ ૩॥

ગૌડપાદભાષ્ય

મૂલપ્રકૃતિઃ પ્રધાનમ્ । પ્રકૃતિવિકૃતિસપ્તકસ્ય મૂલભૂતત્વાત્ । મૂલં
ચ સા પ્રકૃતિશ્ચ મૂલપ્રકૃતિરવિકૃતિઃ । અન્યસ્માન્નોત્પદ્યતે તેન
પ્રકૃતિઃ કસ્યચિદ્વિકારો ન ભવતિ । મહદાદ્યાઃ પ્રકૃતિવિકૃતયઃ
સપ્ત । મહાભૂતાદિતિ બુદ્ધિઃ બુદ્ધ્યાદ્યાઃ સપ્ત બુદ્ધિ ૧ અહંકારઃ
૨ પઞ્ચતન્માત્રાણિ ૫ એતાનિ સપ્તપ્રકૃતિવિકૃતયઃ । તદ્યથા ।
પ્રધાનાદ્બુદ્ધિરુત્પદ્યતે તેન વિકૃતિઃ પ્રધાનસ્ય વિકાર ઇતિ
સૈવાહંકારમુત્પાદયતિ અતઃ પ્રકૃતિઃ । અહંકારોઽપિ બુદ્ધેરુત્પદ્યત
ઇતિ વિકૃતિઃ સ ચ પઞ્ચતન્માત્રાણ્યુત્પાદયતીતિ પ્રકૃતિઃ । તત્ર

શબ્દતન્માત્રમહંકારાદુત્પદ્યત ઇતિ વિકૃતિસ્તસ્માદાકાશમુત્પદ્યત ઇતિ પ્રકૃતિઃ । તથા સ્પર્શતન્માત્રમહંકારાદુત્પદ્યત ઇતિ વિકૃતિસ્તદેવં વાયુમુત્પાદયતીતિ પ્રકૃતિઃ । ગન્ધતન્માત્રમહંકારાદુત્પદ્યત ઇતિ વિકૃતિસ્તદેવં પૃથિવીમુત્પાદયતીતિ પ્રકૃતિઃ । રૂપતન્માત્રમહંકારાદુત્પદ્યત ઇતિ વિકૃતિસ્તદેવં તેજ ઉત્પાદયતીતિ પ્રકૃતિઃ । રસતન્માત્રમહંકારાદુત્પદ્યત ઇતિ વિકૃતિસ્તદેવં આપ ઉત્પાદયતીતિ પ્રકૃતિઃ । એવં મહદાદ્યાઃ સપ્ત પ્રકૃતયો વિકૃતયશ્ચ । ષોડશકશ્ચ વિકારઃ પઞ્ચબુદ્ધીન્દ્રિયાણિ પઞ્ચકર્મેન્દ્રિયાણિ એકાદશં મનઃ પઞ્ચમહાભૂતાનિ એષ ષોડશકો ગણો વિકૃતિરેવ । વિકારો વિકૃતિઃ । ન પ્રકૃતિર્ન વિકૃતિઃ પુરુષઃ । એવમેષાં વ્યક્તાવ્યક્તજ્ઞાનાં ત્રયાણાં પદાર્થાનાં કૈઃ કિયદ્ભિઃ પ્રમાણૈઃ કેન કસ્ય વા પ્રમાણેન સિદ્ધિર્ભવતિ । ઇહ લોકે પ્રમેયવસ્તુ પ્રમાણેન સાધ્યતે યથા પ્રસ્થાદિભિર્વ્રીહયસ્તુલયા ચન્દનાદિ । તસ્માત્ પ્રમાણમભિધેયમ્ ।

દૃષ્ટમનુમાનમાપ્તવચનં ચ સર્વપ્રમાણસિદ્ધત્વાત્ ।
ત્રિવિધં પ્રમાણમિષ્ટં પ્રમેયસિદ્ધિઃ પ્રમાણાદ્ધિ ॥ ૪॥

ગૌડપાદભાષ્ય

દૃષ્ટં યથા શ્રોત્રં ત્વક્ ચક્ષુર્જિહ્વા ઘ્રાણમિતિ પઞ્ચબુદ્ધીન્દ્રિયાણિ શબ્દસ્પર્શરૂપરસગન્ધા એષાં પઞ્ચાનાં પઞ્ચૈવ વિષયા યથાસંખ્યં શબ્દં શ્રોત્રં ત્વક્ સ્પર્શં ચક્ષૂ રૂપં જિહ્વા રસં ઘ્રાણં ગન્ધમિતિ । એતદ્દૃષ્ટમિત્યુચ્યતે પ્રમાણમ્ । પ્રત્યક્ષેણાનુમાનેન વ યોઽર્થો ન ગૃહ્યતે સ આપ્તવચનાદ્ગ્રાહ્યઃ । યથેન્દ્રોઃ દેવરાજઃ ઉત્તરાઃ કુરવઃ સ્વર્ગેઽપ્સરસ ઇત્યાદિ । પ્રત્યક્ષાનુમાનાગ્રાહ્યમથાપ્તવચનાદ્ગૃહ્યતે । અપિ ચોક્તમ્ ।
આગમો હ્યાપ્તવચનમાપ્તં દોષક્ષયાદ્વિદુઃ ।
ક્ષીણદોષોઽનૃતં વાક્યં ન બ્રૂયાદ્ધેત્વસમ્ભવાત્ ॥

સ્વકર્મણ્યભિયુક્તો યઃ સઙ્ગદ્વેષવિવર્જિતઃ ।
પૂજિતસ્તદ્વિધૈર્નિત્યમાપ્તો જ્ઞેયઃ સ તાદૃશઃ ॥

એતેષુ પ્રમાણેષુ સર્વપ્રમાણાનિ સિદ્ધાનિ ભવન્તિ । ષટ્ પ્રમાણાનિ જૈમિનિઃ । અથ કાનિ તાન્યપ્રમાણાનિ । અર્થાપત્તિઃ સમ્ભવઃ અભાવઃ પ્રતિભા ઐતિહ્યં ઉપમાનં ચેતિ ષટ્ પ્રમાણાનિ । તત્રાર્થાપત્તિર્દ્વિવિધા દૃષ્ટા શ્રુતા ચ ।

તત્ર દૃષ્ટા । એકસ્મિન્ પક્ષે આત્મભાવો ગૃહીતશ્ચેદન્યસ્મિન્નપ્યાત્મભાવો ગૃહ્યત એવ । શ્રુતા યથા । દિવા દેવદત્તો ન ભુઙ્ક્તે અથ ચ પીનો દૃશ્યતે અતોઽવગમ્યતે રાત્રૌ ભુઙ્ક્ત ઇતિ । સમ્ભવો યથા । પ્રસ્થ ઇત્યુક્તે ચત્વારઃ કુડવાઃ સમ્ભાવ્યન્તે । અભાવો નામ । પ્રાગિતરેતરાત્યન્તસર્વાભાવલક્ષણઃ । પ્રાગભાવો યથા દેવદત્તઃ કૌમારયૌવનાદિષુ । ઇતરેતરાભાવઃ પટે ઘટાભાવઃ । અત્યન્તાભાવઃ ખરવિષાણવન્ધ્યાસુતખપુષ્પવદિતિ । સર્વાભાવઃ પ્રધ્વંસાભાવો દગ્ધપટવદિતિ । યથા શુષ્કધાન્યદર્શનદ્વૃષ્ટેરભાવોઽવગમ્યતે । એવમભાવોઽનેકધા । પ્રતિભા યથા । દક્ષિણેન વિન્ધ્યસ્ય સહ્યસ્ય ચ યદુત્તરમ્ । પૃથિવ્યામાસમુદ્રાયાં સ પ્રદેશો મનોરમઃ । એવમુક્તે તસ્મિન્ પ્રદેશે શોભનાઃ ગુણાઃ સન્તીતિ પ્રતિભોત્પદ્યતે પ્રતિભાન્વાસસંજ્ઞાનમિતિ । ઐતિહ્યં યથા । બ્રવીતિ લોકો યથાત્ર વટે યક્ષિણી પ્રવસતીત્યેવ ઐતિહ્યમ્ । ઉપમાનં યથા । ગૌરિવ ગવયઃ સમુદ્ર ઇવ તડાગમ્ । એતાનિ ષટ્ પ્રમાણાનિ ત્રિષુ દૃષ્ટાદિષ્વન્તર્ભૂતાનિ । તત્રાનુમાને તાવદર્થાપત્તિરન્તર્ભૂતા । સમ્ભવાભાવપ્રતિભૈતિહ્યોપમાશ્ચાપ્તવચને । તસ્માત્ત્રિષ્વેવ સર્વપ્રમાણસિદ્ધત્વાત્ ત્રિવિધં પ્રમાણમિષ્ટં તદાહ તેન ત્રિવિધેન પ્રમાણેન પ્રમાણસિદ્ધિર્ભવતીતિત વાક્યશેષઃ । પ્રમેયસિદ્ધિઃ પ્રમાણાદ્ધિ । પ્રમેયં પ્રધાનં બુદ્ધિરહંકારઃ પઞ્ચતન્માત્રાણિ એકાદશેન્દ્રિયાણિ પઞ્ચમહાભૂતાનિ પુરુષ ઇતિ એતાનિ પઞ્ચવિંશતિતત્ત્વાનિ વ્યક્તાવ્યક્તજ્ઞાન્યુચ્યન્તે । તત્ર કિઞ્ચિત્ પ્રત્યક્ષેણ સાધ્યં કિઞ્ચિદનુમાનેન કિઞ્ચિદાગમેનેતિ ત્રિવિધં પ્રમાણમુક્તં તસ્ય કિં લક્ષણમેતદાહ ।

પ્રતિવિષયાધ્યવસાયો દૃષ્ટં ત્રિવિધમનુમાનમાખ્યાતમ્ ।
તલ્લિઙ્ગલિઙ્ગિપૂર્વકમાપ્તશ્રુતિરાપ્તવચનં તુ ॥ ૫॥

ગૌડપાદભાષ્ય

પ્રતિવિષયેષુ શ્રોત્રાદિનાં શબ્દાદિવિષયેષુ અધ્યવસાયો દૃષ્ટં પ્રત્યક્ષમિત્યર્થઃ । ત્રિવિધમનુમાનમાખ્યાતં શેષવત્ પૂર્વવત્ સામાન્યતો દૃષ્ટં ચેતિ । પૂર્વમસ્યાસ્તીતિ પૂર્વવદ્ યથા મેઘોન્નત્યા વૃષ્ટિં સાધયતિ પૂર્વવૃષ્ટિત્વાત્ । શેષવદ્યથા સમુદ્રાદેકં જલપલં લવણમાસાદ્ય શેષસ્યાપ્યસ્તિ લવણભાવ ઇતિ । સામાન્યતો દૃષ્ટમ્ । દેશાન્તરાદ્દેશાન્તરં પ્રાપ્તં દૃષ્ટમ્ । ગતિમચ્ચન્દ્રતારકં ચૈત્રવત્ ।

યથા ચૈત્રનામાનં દેશાન્તરાદ્દેશાન્તરં પ્રાપ્તમવલોક્ય ગતિમાનયામીતિ તદ્વચ્ચન્દ્રતારકમિતિ તથા પુષ્પિતામ્રદર્શનાદન્યત્રપુષ્પિતામ્રા ઇતિ સામાન્યતો દૃષ્ટેન સાધયતિ । એતત્સામાન્યદૃષ્ટમ્ ।
કિઞ્ચ તલ્લિઙ્ગલિઙ્ગિપૂર્વકમિતિ તદનુમાનં લિઙ્ગપૂર્વકં યત્ર લિઙ્ગેન લિઙ્ગી અનુમીયતે યથા દણ્ડેન યતિઃ । લિઙ્ગિપૂર્વકં ચ યત્ર લિઙ્ગિના લિઙ્ગમનુમીયતે યથા દૃષ્ટ્વા યતિમસ્યેદં ત્રિદણ્ડમિતિ ।
આપ્તશ્રુતિરાપ્તવચનં ચ । આપ્તા આચાર્યા બ્રહ્માદયઃ । શ્રુતિર્વેદઃ ।
આપ્તશ્ચ શ્રુતિશ્ચ આપ્તશ્રુતી તદુક્તમાપ્તવચનમિતિ । એવં ત્રિવિધં પ્રમાણમુક્તં તત્ર કેન પ્રમાણેન કિં સાધ્યમુચ્યતે ।

સામાન્યતસ્તુ દૃષ્ટાદતીન્દ્રિયાણાં પ્રસિદ્ધિરનુમાનાત્ ।
તસ્માદપિ ચાસિદ્ધં પરોક્ષમાપ્તાગમાત્સિદ્ધમ્ ॥ ૬॥

ગૌડપાદભાષ્ય

સામાન્યતો દૃષ્ટાદનુમાનાદતીન્દ્રિયાણમિન્દ્રિયાણ્યતીત્યવર્ત્તમાનાનાં સિદ્ધિઃ પ્રધાનપુરુષાવતીન્દ્રિયૌ સામાન્યતો દૃષ્ટેનાનુમાનેન સાધ્યેતે યસ્માન્મહદાદિલિઙ્ગં ત્રિગુણમ્ । યસ્યેદં ત્રિગુણં કાર્યં તત્પ્રધાનમિતિ । યતશ્ચાતેનં ચેતનમિવાભાતિ અતોઽન્યોઽધિષ્ઠાતા પુરુષ ઇતિ । વ્યક્તં પ્રત્યક્ષસાધ્યમ્ । તસ્માદપિ ચાસિદ્ધં પરોક્ષમાપ્તાગમાત્ સિદ્ધં યથેન્દ્રો દેવરાજઃ ઉત્તરાઃ કુરવઃ સ્વર્ગેઽપ્સરસ ઇતિ પરોક્ષમાપ્તવચનાત્ સિદ્ધમ્ । અત્ર કશ્ચિદાહ પ્રધાનઃ પુરુષો વા નોપલભ્યતે યચ્ચ નોપલભ્યતે લોકે તન્નાસ્તિ તસ્માત્તાવપિ ન સ્તઃ । યથા દ્વિતીયં શિરસ્તૃતીયો બાહુરિતિ । તદુચ્યતે । અત્ર સતામપ્યર્થાનામષ્ટધોપલબ્ધિર્ન ભવતિ તદ્યથા ।

અતિદૂરાત્સામીપ્યાદિન્દ્રિયઘાતાન્મનોઽનવસ્થાનાત્ ।
સૌક્ષ્મ્યાદ્વ્યવધાનાદભિભવાત્સમાનાભિહારાચ્ચ ॥ ૭॥

ગૌડપાદભાષ્ય

ઇહ સતામપ્યર્થાનામતિદૂરાદનુપલબ્ધિર્દૃષ્ટા । યથા દેશાન્તરસ્થાનાં ચૈત્રમૈત્રવિષ્ણુમિત્રાણામ્ । સામીપ્યાદ્યથા ચક્ષુષોઽઞ્જનાનુપલબ્ધિઃ ।
ઇન્દ્રિયાભિઘાતાદ્યથા બધિરાન્ધયોઃ શબ્દરૂપાનુપલબ્ધિઃ ।
મનોઽનવસ્થાનાદ્યથા વ્યગ્રચિત્તઃ સમ્યક્કથિતમપિ નાવધારયતિ ।
સૌક્ષ્મ્યાદ્યથા ધૂમોષ્મજલનીહારપરમાણવો ગગનગતા નોપલભ્યન્તે । વ્યવધાનાદ્યથા કુડ્યેન પિહિતં વસ્તુ નોપલભ્યતે ।

અભિભવાદ્યથા સૂર્યતેજસાભિભૂતા ગ્રહનક્ષત્રતારકાદયો નોપલભ્યન્તે । સમાનાભિહારાદ્યથા મુદ્ગરાશૌ મુદ્ગઃ ક્ષિપ્તઃ કુવલયામલકમધ્યે કુવલયામલકે ક્ષિપ્તે કપોતમધ્યે કપોતો નોપલભ્યતે સનાનદ્રવ્યમધ્યાહૃતત્વાત્ । એવમષ્ટધાનુપલબ્ધિઃ સતામર્થાનામિહ દૃષ્ટા । એવં ચાસ્તિ કિમભ્યુપગમ્યતે પ્રધાનપુરુષયોરપ્યેતયોર્વાનુપલબ્ધિઃ કેન હેતુના કેન ચોપલબ્ધિસ્તદુચ્યતે ।

સૌક્ષ્મ્યાત્તદનુપલબ્ધિર્નાભાવાત્કાર્યતસ્તદુપલબ્ધિઃ ।
મહદાદિ તચ્ચ કાર્યં પ્રકૃતિવિરૂપં સ્વરૂપં ચ ॥ ૮॥

ગૌડપાદભાષ્ય

સૌક્ષ્મ્યાત્તદનુપલબ્ધિઃ પ્રધાનસ્યેત્યર્થઃ । પ્રધાનં સૌક્ષ્મ્યાન્નોપલભ્યતે યથાકાશે ધૂમોષ્મજલનીહારપરમાણવઃ સન્તોઽપિ નોપલભ્યન્તે । કથં તર્હિ તદુપલબ્ધિઃ । કાર્યતસ્તદુપલબ્ધિઃ । કાર્યેણ દૃષ્ટ્વા કારણમનુમીયતે । અસ્તિ પ્રધાનં કારણં યસ્યેદં કાર્યમ્ । બુદ્ધિરહંકારપઞ્ચતન્માત્રાણિ એકાદશેન્દ્રિયાણિ પઞ્ચમહાભૂતાનિ એવ તત્કાર્યમ્ । તચ્ચ કાર્યં પ્રકૃતિવિરૂપમ્ । પ્રકૃતિઃ પ્રધાનં તસ્ય વિરૂપં પ્રકૃતેરસદૃશં સ્વરૂપં ચ સમાનરૂપં ચ તથા લોકેઽપિ પિતુસ્તુલ્ય એવ પુત્રો ભવત્યતુલ્યશ્ચ । યેન હેતુના તુલ્યમતુલ્યં તદુપરિષ્ટાદ્વક્ષ્યામઃ । યદિદં મહદાદિકાર્યં તત્કિં પ્રધાને સદુતાદહોસ્વિદસદાચાર્યવિપ્રતિપત્તેરયં સંશયઃ । યતોઽત્ર સાંખ્યદર્શને સત્કાર્યં બૌદ્ધાદીનામસત્કાર્યમ્ । યદિ સદસન્ન ભવત્યસત્સન્ન ભવતીતિ વિપ્રતિષેધસ્તત્રાહ ।

અસદકરણાદુપાદાનગ્રહણાત્સર્વસમ્ભવાભાવાત્ ।
શક્તસ્ય શક્યકરણાત્કારણભાવાચ્ચ સત્કાર્યમ્ ॥ ૯॥

ગૌડપાદભાષ્ય

અસદકરણાન્ન સદસતોઽકરણં તસ્માત્સત્કાર્યં ઇહલોકેઽસત્કરણં નાસ્તિ યથા સિકતાભ્યસ્તૈલોત્પત્તિસ્તસ્માત્સતઃ કરણાદસ્તિ પ્રાગુ(ત્પ)ત્તેઃ । પ્રધાને વ્યક્તમતઃ સત્કાર્યમ્ । કિં ચાન્યદુપાદાનગ્રહણાદુપાદાનં કારણં તસ્ય ગ્રહણાદિહલોકે યો યેનાર્થી સ તદુપાદાનગ્રહણં કરોતિ દધ્યર્થી ક્ષીરસ્ય ન તુ જલસ્ય તસ્માત્ સત્કાર્યમ્ । ઇતશ્ચ સર્વસમ્ભવાભાવાત્

સર્વસ્ય સર્વત્રસમ્ભવો નાસ્તિ યથા સુવર્ણસ્ય રજતાદૌ તૃણપાંશુસિકતાસુ તસ્માત્ સર્વસમ્ભવાભાવાત્ સત્કાર્યમ્ । ઇતશ્ચ શક્તસ્ય શક્યકરણાત્ । ઇહ કુલાલઃ શક્તો મૃદ્દણ્ડચક્રચીવરરજ્જુનીરાદિકરણોપકરણં વા શક્યમેવ ઘટાં મૃત્પિણ્ડાદુત્પાદયતિ તસ્માત્ સત્કાર્યમ્ । ઇતશ્ચ કારણભાવાચ્ચ સત્કાર્યમ્ । કારણં યલ્લક્ષણં તલ્લક્ષણમેવ કાર્યમેવ યથા યવેભ્યોઽપિ યવાઃ વ્રીહીભ્યો વ્રીહયઃ યદાઽસત્કાર્યં સ્યાત્તતઃ કોદ્રવેભ્યઃ શાલયઃ સ્યુર્ન ચ સન્તીતિ તસ્માત્ સત્કાર્યમ્ । એવં પઞ્ચભિર્હેતુભિઃ પ્રધાને મહદાદિલિઙ્ગમસ્તિ તસ્માત્સત ઉત્પત્તિર્નાસત ઇતિ । પ્રકૃતિવિરૂપં સરૂપં ચ યદુક્તં કથમિત્યુચ્યતે ।

હેતુમદનિત્યમવ્યાપિ સક્રિયમનેકમાશ્રિતં લિઙ્ગમ્ ।
સાવયવં પરતન્ત્રં વ્યક્તં વિપરીતમવ્યક્તમ્ ॥ ૧૦॥

ગૌડપાદભાષ્ય

વ્યક્તં મહદાદિકાર્યં હેતુમદિતિ હેતુરસ્યાસ્તિ હેતુમત્ । ઉપાદાનં હેતુઃ કારણં નિમિત્તમિતિ પર્યાયાઃ । વ્યક્તસ્ય પ્રધાનં હેતુરસ્તિ અતો હેતુમદ્વ્યક્તં ભૂતપર્યન્તં હેતુમદ્બુદ્ધિમત્ત્વં પ્રધાનેન હેતુમાનહંકારો બુદ્ધ્યા પઞ્ચતન્માત્રાણિ એકાદશેન્દ્રિયાણિ હેતુમન્ત્યહંકારેણ । આકાશં શબ્દતન્માત્રેણ હેતુમત્ । વાયુઃ સ્પર્શતન્માત્રેણ હેતુમાન્ । તેજો રૂપતન્માત્રેણ હેતુમત્ । આપો રસતન્માત્રેણ હેતુમત્યઃ । પૃથિવી ગન્ધતન્માત્રેન હેતુમતી । એવં ભૂતપર્યન્તં વ્યક્તં હેતુમત્ । કિં ચાન્યદનિત્યં યસ્માદન્યસ્માદુત્પદ્યતે યથા મૃત્પિણ્ડાદુત્પદ્યતે ઘટઃ સ ચાનિત્યઃ । કિં ચાવ્યાપ્યસર્વગમિત્યર્થઃ યથા પ્રધાનપુરુષૌ સર્વગતૌ નૈવ વ્યક્તમ્ । કિંચાન્યત્ સક્રિયં સંસારકાલે સંસરતિ ત્રયોદશવિધેન કરણેન સંયુક્તં સૂક્ષ્મં શરીરમાશ્રિત્ય સંસરતિ તસ્માત્ સક્રિયમ્ । કિંચાન્યદનેકં બુદ્ધિરહંકારઃ પઞ્ચતન્માત્રાન્યેકાદશેન્દ્રિયાણિ ચ પઞ્ચમહાભૂતાનિ પઞ્ચતન્માત્રાશ્રિતાનિ । કિંચ લિઙ્ગં લયયુક્તં લયકાલે પઞ્ચમહાભૂતાનિ તન્માત્રેષુ લીયન્તે તાન્યેકાદશેન્દ્રિયૈઃ સહાહંકારે સ ચ બુદ્ધૌ સા ચ પ્રધાને લયં યાતીતિ । તથા સાવયવં અવયવાઃ શબ્દસ્પર્શરસરૂપગન્ધાઃ તૈઃ સહ । કિંચ પરતન્ત્રં નાત્મનઃ પ્રભવતિ યથા પ્રધાનતન્ત્રા બુદ્ધિઃ બુદ્ધિતન્ત્રોઽહંકારઃ અહંકારતન્ત્રાણિ તન્માત્રાણીન્દ્રિયાણિ ચ તન્માત્રતન્ત્રાણિ પઞ્ચમહાભૂતાનિ ચ । એવં પરતન્ત્રં પરાયત્તં વ્યાખ્યાતં વ્યક્તમ્ । અથોઽવ્યક્તં

વ્યાખ્યામઃ । વિપરીતમવ્યક્તમ્ । એતૈરેવ ગુણૈર્યથોક્તૈર્વિપરીતમવ્યક્તં હેતુમદ્વ્યક્તમુક્તમ્ । નહિ પ્રધાનાત્ પરં કિઞ્ચિદસ્તિ યતઃ પ્રધાનસ્યાનુત્પત્તિઃ તસ્માદહેતુમદવ્યક્તમ્ । તથાનિત્યં ચ વ્યક્તં નિત્યમવ્યક્તમનુત્પાદ્યત્વાત્ નહિ ભૂતાનિ કુતશ્ચિદુત્પદ્યન્તેતિ પ્રધાનમ્ । કિં ચાવ્યાપિ વ્યક્તં વ્યાપિ પ્રધાનં કાર્ય્યં સ્યાત્ । તથા વ્યક્તં લિઙ્ગમલિઙ્ગમવ્યક્તં નિત્યત્વાન્મહદાદિ લિઙ્ગં પ્રલયકાલે પરસ્પરં પ્રલીયતે નૈવં પ્રધાનં તસ્માદલિઙ્ગં પ્રધાનમ્ । તથા સાવયવં વ્યક્તં નિરવયવમવ્યક્તં નહિ શબ્દસ્પર્શરસરૂપગન્ધાઃ પ્રધાને સન્તિ । તથા પરતન્ત્રં વ્યક્તં સ્વતન્ત્રમવ્યક્તં પ્રભવત્યાત્મનઃ । એવં વ્યક્તાવ્યક્તયોર્વૈધર્મ્યમુક્તં સાધર્મ્યમુચ્યતે યદુક્તં સરૂપં ચ ।

ત્રિગુણમવિવેકિ વિષયઃ સામાન્યમચેતનં પ્રસવધર્મિ ।
વ્યક્તં તથા પ્રધાનં તદ્વિપરીતસ્તથા ચ પુમાન્ ॥ ૧૧॥

ગૌડપાદભાષ્ય

ત્રિગુણં વ્યક્તં સત્ત્વરજસ્તમાંસિ ત્રયો ગુણા યસ્યેતિ । અવિવેકિ વ્યક્તં ન વિવેકોઽસ્યાસ્તીતિ । ઇદં વ્યક્તમિમે ગુણા ઇતિ ન વિવેકકર્ત્તું યાતિ અયં ગૌરયમશ્વ ઇતિ યથા યે ગુણાસ્તદ્વ્યક્તં યદ્વ્યક્તં તે ચ ગુણા ઇતિ । તથા વિષયો વ્યક્તં ભોજ્યમિત્યર્થઃ સર્વપુરુષાણાં વિષયભૂતત્વાત્ । તથા સામાન્યં વ્યક્તં મૂલ્યદાસીવત્ સર્વસાધારણત્વાત્ । અચેતનં વ્યક્તં સુખદુઃખમોહાન્ન ચેતયતીત્યર્થઃ । તથા પ્રસવધર્મિ વ્યક્તં તદ્યથા બુદ્ધેરહંકારઃ પ્રસૂયતે તસ્માત્ પઞ્ચતન્માત્રાણિ એકાદશેન્દ્રિયાણિ ચ પ્રસૂયન્તે તન્માત્રેભ્યઃ પઞ્ચમહાભૂતાનિ । એવમેતે વ્યક્તધર્માઃ પ્રસવધર્માન્તા ઉક્તા એવમેભિરવ્યક્તં સરૂપં યથા વ્યક્તં તથા પ્રધાનમિતિ । તત્ર ત્રિગુણં વ્યક્તમવ્યક્તમપિ ત્રિગુણં યસ્યૈતન્મહદાદિ કાર્યં ત્રિગુણમ્ । ઇહ યદાત્મકં કારણં તદાત્મકં કાર્યમિતિ યથા કૃષ્ણતન્તુકૃતઃ કૃષ્ણ એવ પટો ભવતિ । તથાવિવેકિ વ્યક્તં પ્રધાનમપિ ગુણૈર્ન ભિદ્યતે અન્યે ગુણા અન્યત્ પ્રધાનમેવ વિવક્તું ન યાતિ તદવિવેકિ પ્રધાનમ્ । તથા વિષયો વ્યક્તં પ્રધાનમપિ સર્વપુરુષવિષયભૂતત્વાદ્વિષય ઇતિ । તથા સામાન્યં વ્યક્તં પ્રધાનમપિ સર્વસાધારણત્વાત્ । તથાઽચેતનં વ્યક્તં પ્રધાનમપિ સુખદુઃખમોહાન્ન ચેતયતીતિ કથમનુમીયત ઇહ હ્યચેતનાન્મૃત્પિણ્ડાદચેતનો ઘટા ઉત્પદ્યતે । એવં પ્રધાનમપિ વ્યાખ્યાતમ્ । ઇદાનીં તદ્વિપરીતસ્તથા

પુમાનિત્યેતદ્વ્યાખ્યાયતે । સદ્વિપરીતસ્તાભ્યાં વ્યક્તાવ્યક્તાભ્યાં વિપરીતઃ પુમાન્ ।
તદ્યથા ત્રિગુણં વ્યક્તમવ્યક્તં ચાગુણઃ પુરુષઃ । અવિવેકિ વ્યક્તમવ્યક્તં
ચ વિવેકી પુરુષઃ । તથા વિષયો વ્યક્તમવ્યક્તં ચાવિષયઃ પુરુષઃ ।
તથા સામાન્યં વ્યક્તમવ્યક્તં ચાસામાન્યઃ પુરુષઃ । અચેતનં વ્યક્તમવ્યક્તં
ચ ચેતનઃ પુરુષઃ સુખદુઃખમોહાંશ્ચેતયતિ સંજાનીતે તસ્માચ્ચેતનઃ
પુરુષ ઇતિ । પ્રસવધર્મિ વ્યક્તં પ્રધાનં ચાપ્રસવધર્મી પુરુષો નહિ
કિઞ્ચિત્ પુરુષાત્ પ્રસૂયતે । તસ્માદુક્તં તદ્વિપરીતઃ પુમાનિતિ । તદુક્તં
તથા ચ પુમાનિતિ । તત્ પૂર્વસ્યામાર્યાયાં પ્રધાનમહેતુમદ્યથા વ્યાખ્યાતં
તથા ચ પુમાન્ તદ્યથા હેતુમદનિત્યમિત્યાદિ વ્યક્તં તદ્વિપરીતમવ્યક્તં
તત્ર હેતુમદ્વ્યક્તમહેતુમત્ પ્રધાનં તથા ચ પુમાનહેતુમાનનુત્પાદ્યત્વાત્ ।
અનિત્યં વ્યક્તં નિત્યં પ્રધાનં તથા ચ નિત્યઃ પુમાન્ । અક્રિયઃ
સર્વગતત્વાદેવ । અનેકં વ્યક્તમેકમવ્યક્તં તથા પુમાન્યપ્યેકઃ ।
આશ્રિતં વ્યક્તમનાશ્રિતમવ્યક્તં તથા ચ પુમાનનાશ્રિતઃ । લિઙ્ગં
વ્યક્તમલિઙ્ગં પ્રધાનં તથા ચ પુમાનપ્યલિઙ્ગઃ । ન ક્વચિલ્લીયત
ઇતિ । સાવયવં વ્યક્તં નિરવયવમવ્યક્તં તથા ચ પુમાન્ નિરવયવઃ ।
નહિ પુરુષે શબ્દાદયોઽવયવાઃ સન્તિ । કિંચ પરતન્ત્રં વ્યક્તં
સ્વતન્ત્રમવ્યક્તં તથા ચ પુમાનપિ સ્વતન્ત્રઃ । આત્મનઃ પ્રભવતીત્યર્થઃ ।
એવમેતદવ્યક્તપુરુષયોઃ સાધર્મ્યં વ્યાખ્યાતં પૂર્વસ્યામાર્યાયામ્ ।
વ્યક્તપ્રધાનયોઃ સાધર્મ્યં પુરુષસ્ય વૈધર્મ્યં ચ ત્રિગુણમવિવેકીત્યાદિ
પ્રકૃત્યાર્યાયાં વ્યાખ્યાતમ્ । તત્ર યદુક્તં ત્રિગુણમિતિ વ્યક્તમવ્યક્તં
ચ તત્ કે તે ગુણા ઇતિ તત્ સ્વરૂપપ્રતિપાદનાયેદમાહ ।

પ્રીત્યપ્રીતિવિષાદાત્મકાઃ પ્રકાશપ્રવૃત્તિનિયમાર્થાઃ ।
અન્યોઽન્યાભિભવાશ્રયજનનમિથુનવૃત્તયશ્ચ ગુણાઃ ॥ ૧૨॥

ગૌડપાદભાષ્ય

પ્રીત્યાત્મકા અપ્રીત્યાત્મકાઃ વિષાદાત્મકાશ્ચ ગુણાઃ સત્ત્વરજસ્તમાંસીત્યર્થઃ ।
તત્ર પ્રીત્યાત્મકં સત્ત્વં પ્રીતિઃ સુખં તદાત્મકમિતિ । અપ્રીત્યાત્મકં
રજઃ । વિષાદાત્મકં તમઃ । વિષાદો મોહઃ । તથા પ્રકાશપ્રવૃત્તિ
નિયમાર્થાઃ । અર્થઃ શબ્દઃ સામર્થ્યવાચી પ્રકાશાર્થં સત્ત્વં
પ્રકાશસમર્થમિત્યર્થઃ । પ્રવૃત્ત્યર્થં રજો નિયમાર્થં
તમઃ સ્થિતૌ સમર્થમિત્યર્થઃ પ્રકાશક્રિયાસ્થિતિશીલા ગુણા ઇતિ ।
તથાઽન્યોન્યાભિભવાશ્રયજનનમિથુનવૃત્તયશ્ચ । અન્યોન્યાભિભવાઃ

અન્યોન્યાશ્રયાઃ અન્યોન્યજનનાઃ અન્યોન્યમિથુનાઃ અન્યોન્યવૃત્તયશ્ચ તે તથોક્તાઃ । અન્યોન્યાભિભવા ઇતિ અન્યોન્યં પરસ્પરમભિભવન્તીતિ પ્રીત્યપ્રીત્યાદિભિર્ધર્મૈરાવિર્ભવન્તિ યથા યદા સત્ત્વમુત્કટં ભવતિ તદા રજસ્તમસી અપ્રીતિપ્રવૃત્તિધર્મેણ યદા તમસ્તદા સત્ત્વરજસી વિષાદસ્થિત્યાત્મકેન ઇતિ । તથાઽન્યોન્યાશ્રયાશ્ચ દ્વ્યણુકવદ્ગુણાઃ । અન્યોન્યજનનાઃ યથા મૃત્પિણ્ડો ઘટં જનયતિ । તથાઽન્યોન્યમિથુનાશ્ચ યથા સ્ત્રીપુંસૌ અન્યોન્યમિથુનૌ તથા ગુણાઃ । ઉક્તં ચ ।

રજસો મિથુનં સત્ત્વં સત્ત્વસ્ય મિથુનં રજઃ ।
ઉભયોઃ સત્ત્વરજરોર્મિથુનં તમ ઉચ્યતે ॥

પરસ્પરસહાયા ઇત્યર્થઃ । અન્યોન્યવૃત્તયશ્ચ પરસ્પરં વર્ત્તન્તે ગુણાઃ ગુણેષુ વર્ત્તન્ત ઇતિ વચનાત્ । યથા સુરૂપા સુશીલા સ્ત્રી સર્વસુખહેતુઃ સપત્નીનાં સૈવ દુઃખહેતુઃ સૈવ રાગિણાં મોહં જનયતિ એવ સત્વં રજસ્તમસોર્વૃત્તિહેતુર્યથા રાજા સદોદ્યુક્તઃ પ્રજાપાલને દુષ્ટનિગ્રહે શિષ્ટાનાં સુખમુત્પાદયતિ દુષ્ટાનાં દુઃખં મોહં ચ એવં રજસ્સત્ત્વતમસોર્વૃત્તિં જનયતિ । તથા તમઃ સ્વરૂપેણાવરણાત્મકેન સત્ત્વરજસોર્વૃત્તિં જનયતિ યથા મેઘાઃ ખમાવૃત્ય જગતઃ સુખમુત્પાદયન્તિ તે વૃષ્ટ્યા કર્ષુકાણાં કર્ષણોદ્યોગં જનયન્તિ વિરહિણાં મોહમેવમન્યોન્યવૃત્તયો ગુણાઃ । કિંચાન્યત્ ।

સત્ત્વં લઘુ પ્રકાશકમિષ્ટમુપષ્ટમ્ભકં ચલં ચ રજઃ ।
ગુરુ વરણકમેવ તમઃ પ્રદીપવચ્ચાર્થતો વૃત્તિઃ ॥ ૧૩॥

ગૌડપાદભાષ્ય

સત્ત્વં લઘુ પ્રકાશકં ચ યદા સત્ત્વમુત્કટં ભવતિ તદા લઘૂન્યઙ્ગાનિ બુદ્ધિપ્રકાશશ્ચ પ્રસન્નતેન્દ્રિયાણાં ભવતિ । ઉપષ્ટમ્ભકં ચલં ચ રજઃ ઉપષ્ટમ્ભાતીત્યુપષ્ટમ્ભકમુદ્યોતકં યથા વૃષો વૃષદર્શને ઉત્કટમુપષ્ટમ્ભં કરોતિ એવ રજોવૃત્તિઃ । તથા રજશ્ચ ચલં દૃષ્ટં રજોવૃત્તિશ્ચલચિત્તો ભવતિ । ગુરુ વરણમેકમેવ તમઃ યદા તમ ઉત્કટં ભવતિ તદા ગુરૂણ્યઙ્ગાન્યાવૃતાનીન્દ્રિયાણિ ભવન્તિ સ્વાર્થાસમર્થાનિ । અત્રાહ યદિ ગુણાઃ પરસ્પરં વિરુદ્ધાઃ સ્વમતેનૈવ કમર્થં નિષ્પાદયન્તિ તર્હિ કથં પ્રદીપવચ્ચાર્થતો વૃત્તિઃ પ્રદીપેન તુલ્યં પ્રદીપવદર્થતઃ સાધના વૃત્તિરિષ્ટા યથા

પ્રદીપઃ પરસ્પરવિરુદ્ધતૈલાગ્નિવર્ત્તિસંયોગાદર્થપ્રકાશાન્ જનયતિ એવં સત્ત્વરજસ્તમાંસિ પરસ્પરં વિરુદ્ધાન્યર્થં નિષ્પાદયન્તિ । અન્તરપ્રશ્નો ભવતિ ત્રિગુણમવિવેકિ વિષય ઇત્યાદિ પ્રધાનં વ્યક્તં ચ વ્યાખ્યાતં તત્ર પ્રધાનમુપલભ્યમાનં મહદાદિ ચ ત્રિગુણમવિવેક્યાદીતિ ચ કથમવગમ્યતે તત્રાહ ।

અવિવેક્યાદિઃ સિદ્ધસ્ત્રૈગુણ્યાત્તદ્વિપર્યયાભાવાત્ ।
કારણગુણાત્મકત્વાત્કાર્યસ્યાવ્યક્તમપિ સિદ્ધમ્ ॥ ૧૪॥

ગૌડપાદભાષ્ય

યોઽયમવિવેક્યાદિર્ગુણઃ સ ત્રૈગુણ્યાન્મહદાદૌઽવ્યક્તેનાયં સિદ્ધ્યતિ । અત્રોચ્યતે તદ્વિપર્યયાભાવાત્તસ્ય વિપર્યયસ્તદ્વિપર્યયસ્તસ્યાભાવસ્તદ્વિપર્યયાભાવસ્તસ્માત્ સિદ્ધમવ્યક્તમ્ । યથા યત્રૈવ તન્તવસ્તત્રૈવ પટઃ । અન્યે તન્તવોઽન્યઃ પટો ન કુતસ્તદ્વિપર્યયાભાવાત્ । એવં વ્યક્તાવ્યક્તસમ્પન્નો ભવતિ દૂરં પ્રધાનમાસન્નં વ્યક્તં યો વ્યક્તં પશ્યતિ સ પ્રધાનમપિ પશ્યતિ તદ્વિપર્યયાભાવાત્ । ઇતશ્ચાવ્યક્તં સિદ્ધં કારણગુણાત્મકત્વાત્ કાર્યસ્ય । લોકે યદાત્મકં કારણં તદાત્મકં કાર્યમપિ તથા કૃષ્ણેભ્યસ્તન્તુભ્યઃ કૃષ્ણ એવ પટો ભવતિ । એવં  મહદાદિલિઙ્ગમવિવેકિવિષયઃ સામાન્યચેતનં પ્રસવધર્મિ યદાત્મકં લિઙ્ગં તદાત્મકમવ્યક્તમપિ સિદ્ધમ્ । ત્રૈગુણ્યાદવિવેક્યાદિર્વ્યક્તે સિદ્ધસ્તદ્વિપર્યયાભાવાત્ । એવં કારણગુણાત્મકત્વાત્ કાર્યસ્યાવ્યક્તમપિ સિદ્ધમિત્યેતન્મિથ્યા લોકે યન્નોપલભ્યતે તન્નાસ્તિ એવં પ્રધાનમપ્યસ્તિ કિં તુ નોપલભ્યતે ।

ભેદાનાં પરિમાણાત્સમન્વયાચ્છક્તિતઃ પ્રવૃત્તેશ્ચ ।
કારણકાર્યવિભાગાદવિભાગાદ્વૈશ્વરૂપ્યસ્ય ॥ ૧૫॥

ગૌડપાદભાષ્ય

કારણમસ્ત્યવ્યક્તમિતિ ક્રિયાકારકસમ્બન્ધઃ । ભેદાનાં પરિમાણાલોકે યત્ર કર્ત્તાસ્તિ તસ્ય પરિમાણં દૃષ્ટં યથા કુલાલઃ પરિમિતૈર્મૃત્પિણ્ડૈઃ પરિમિતાનેવ ઘટાન્ કરોતિ એવં મહદપિ મહદાદિલિઙ્ગં પરિમિતં ભેદતઃ પ્રધાનકાર્યમેકા બુદ્ધિરેકોઽહંકારઃ પઞ્ચ તન્માત્રાણિ એકાદશેન્દ્રિયાણિ પઞ્ચતન્માત્રાણિ એકાદશેન્દ્રિયાણિ પઞ્ચમહાભૂતાનીત્યેવં ભેદાનાં પરિમાણાદસ્તિ પ્રધાનં કારણં યદ્વ્યક્તં પરિમિતમુત્પાદયતિ ।યદિ

પ્રધાનં ન સ્યાત્તદા નિઃપરિમાણમિદં વ્યક્તમપિ ન સ્યાત્ પરિમાણાચ્ચ ભેદાનામસ્તિ પ્રધાનં યસ્માદ્વ્યક્તમુત્પન્નમ્ । તથા સમન્વયાદિહ લોકે પ્રસિદ્ધિર્દૃષ્ટા યથા વ્રતધારિણં બટું દૃષ્ટ્વા સમન્વયતિ નૂનમસ્ય પિતરૌ બ્રાહ્મણાવિતિ એવમિદં ત્રિગુણં મહદાદિલિઙ્ગં દૃષ્ટ્વા સાધયામોઽસ્ય યત્ કારણં ભવિષ્યતીતિ અતઃ સમન્વયાદસ્તિ પ્રધાનમ્ । તથા શક્તિતઃ પ્રવૃત્તેશ્ચ ઇહ યો યસ્મિન્ શક્તઃ સ તસ્મિન્નેવાર્થે પ્રવર્ત્તતે યથા કુલાલો ઘટાસ્ય કરણે સમર્થો ઘટમેવ કરોતિ ન પટં રથં વા । તથાસ્તિ પ્રધાનં કારણં કુતઃ કારણકાર્યવિભાગાત્ । કરોતીતિ કારણમ્ । ક્રિયત ઇતિ કાર્યમ્ । કારણસ્ય કાર્યસ્ય ચ વિભાગો યથા ઘટો દધિમધૂદકપયસાં ધારણે સમર્થો ન તથા તક્તારણં મૃત્પિણ્ડઃ । મૃત્પિણ્ડો વા ઘટં નિષ્પાદયતિ ન ચૈવં ઘટો મૃત્પિણ્ડમ્ । એવં મહદાદિલિઙ્ગં દૃષ્ટ્વાનુમીયતે । અસ્તિ વિભક્તં તત્ કારણં યસ્ય વિભાગ ઇદં વ્યક્તમિતિ । ઇતશ્ચ અવિભાગાદ્વૈશ્વરૂપસ્ય વિશ્વં જગત્ તસ્ય રૂપં વ્યક્તિઃ । વિશ્વરૂપસ્ય ભાવો વૈશ્વરૂપં તસ્યાવિભાગાદસ્તિ પ્રધાનં યસ્માત્રૈલોક્યસ્ય પઞ્ચાનાં પૃથિવ્યાદીનાં મહાભૂતાનાં પરસ્પરં વિભાગો નાસ્તિ મહાભૂતેષ્વન્તર્ભૂતાસ્ત્રયો લોકા ઇતિ પૃથિવ્યાપસ્તેજોવાયુરાકાશમિતિ એતાનિ પઞ્ચમહાભૂતાનિ પ્રલયકાલે સૃષ્ટિક્રમેણૈવાવિભાગં યાન્તિ તન્માત્રેષુ પરિણામિષુ તન્માત્રાણ્યેકાદશેન્દ્રિયાણિ ચાહંકારે અહંકારો બુદ્ધૌ બુદ્ધિઃ પ્રધાને એવં ત્રયો લોકાઃ પ્રલયકાલે પ્રકૃતાવવિભાગં ગચ્છન્તિ તસ્માદવિભાગાત્ ક્ષીરદધિવદ્વ્યક્તાવ્યક્તયોરવ્યક્તં કારણમ્ । અતશ્ચ ।

કારણમસ્ત્યવ્યક્તં પ્રવર્તતે ત્રિગુણતઃ સમુદયાચ્ચ ।
પરિણામતઃ સલિલવત્પ્રતિપ્રતિગુણાશ્રયવિશેષાત્ ॥ ૧૬॥

ગૌડપાદભાષ્ય

અવ્યક્તં પ્રખ્યાતં કારણમસ્તિ યસ્માન્મહદાદિલિઙ્ગં પ્રવર્ત્તતે । ત્રિગુણતઃ ત્રિગુણાત્ સત્ત્વરજસ્તમોગુણા યસ્મિંસ્તત્ત્રિગુણં તત્કિમુક્તં ભવતિ સત્ત્વરજસ્તમસાં સામ્યાવસ્થા પ્રધાનમ્ । તથા સમુદયાત્ યથા ગંગાશ્રોતાંસિ ત્રિણી રુદ્રમૂર્દ્ધનિ પતિતાનિ એકં સ્રોતો જનયતિ એવં ત્રિગુણમવ્યક્તમેકં વ્યક્તં જનયતિ તથા વા તન્તવઃ સમુદિતાઃ પટં જનયન્તિ એવમવ્યક્તં ગુનસમુદયાન્મહદાદિ જનયતીતિ ત્રિગુણતઃ સમુદયાચ્ચ વ્યક્તં જગત્ પ્રવર્ત્તતે । યસ્માદેકસ્માત્ પ્રધાનાદ્વ્યક્તં તસ્માદેકરૂપેણ ભવિતવ્યમ્ । નૈષ દોષઃ પરિણામતઃ સલિલવત્ પ્રતિપ્રતિગુણાશ્રયવિશેષાદેકસ્માત્

પ્રધાનાત્ ત્રયો લોકાઃ સમુત્પન્નાસ્તુલ્યભાવા ન ભવન્તિ દેવાઃ સુખેન યુક્તા મનુષ્યા દુઃખેન તિર્યઞ્ચો મોહેન એકસ્માત્ પ્રધાનાત્ પ્રવૃત્તં વ્યક્તં પ્રતિપ્રતિગુણાશ્રયવિશેષાત્ પરિણમાતઃ સલિલવદ્ભવતિ । પ્રતિપ્રતીતિ વીપ્સા । ગુણાનામાશ્રયો ગુણાશ્રયસ્તદ્વિશેષસ્તં ગુણાશ્રયવિશેષં પ્રતિનિધાય પ્રતિપ્રતિગુણાશ્રયવિશેષં પરિણામાત્ પ્રવર્ત્તતે વ્યક્તં યથા આકાશાદેકરસં સલિલં પતિતં નાનારૂપાત્સંશ્લેષાદ્ભિદ્યતે તદ્રસાન્તરૈરેવમેકસ્માત્ પ્રધાનાત્ પ્રવૃત્તાસ્ત્રયો લોકા નૈકસ્વભાવા ભવન્તિ દેવેષુ સત્ત્વમુત્કટં રજસ્તમસી ઉદાસીને તેન તેઽત્યન્તસુખિનો મનુષ્યેષુ રજ ઉત્કટં ભવતિ સત્ત્વતમસી ઉદાસીને તેન તેઽત્યન્તદુઃખિનો તિર્યક્ષુ તમ ઉત્કટં ભવતિ સત્ત્વજસી ઉદાસીને તેન તેઽત્યન્તમૂઢાઃ । એવમાર્યાદ્વયેન પ્રધાનસ્યાસ્તિત્વમભ્યુપગમ્યતે । ઇતશ્ચોત્તરં પુરુષાસ્તિત્વપ્રતિપાદનાર્થમાહ ।

સઙ્ઘાતપરાર્થત્વાત્ત્રિગુણાદિવિપર્યયાદધિષ્ઠાનાત્ ।
પુરુષોઽસ્તિ ભોક્તૃભાવાત્કૈવલ્યાર્થપ્રવૃત્તેશ્ચ ॥ ૧૭॥

ગૌડપાદભાષ્ય

યદુક્તં વ્યક્તાવ્યક્તવિજ્ઞાનાન્મોક્ષઃ પ્રાપ્યત ઇતિ તત્ર વ્યક્તાદનન્તરમવ્યક્તં પઞ્ચભિઃ કારણૈરધિગતમવ્યક્તવત્ પુરુષોઽપિ સૂક્ષ્મસ્તસ્યાધુનાનુમિતાસ્તિત્વં પ્રતિક્રિયતે । અસ્તિ પુરુષઃ કસ્માત્ સંઘાતપરાર્થત્વાત્ । યોઽયં મહદાદિ સંઘાતઃ સ પુરુષાર્થ ઇત્યનુમીયતે અચેતનત્વાત્ પર્યઙ્ગવત્ । યથા પર્યઙ્કુ પ્રત્યેકં ગાત્રોત્પલકપાદવટતૂલીપ્રછાદનપટોપધાનસંઘતઃ પરાર્થો નહિ સ્વાર્થઃ પર્યઙ્કુસ્ય નહિ કિઞ્ચિદપિ ગાત્રોત્પલાદ્યવયવાનાં પરસ્પરં કૃત્યમસ્તિ । અતોઽવગમ્યતેઽસ્તિ પુરુષો યઃ પર્યઙ્કું શેતે યસ્યાર્થં પર્યઙ્કુસ્તત્પરાર્થમિદં શરીરં પઞ્ચાનાં મહાભૂતાનાં સંઘાતો વર્ત્તતેઽસ્તિ પુરુષો યસ્યેદં ભોગ્યશરીરં ભોગ્યં મહદાદિસંઘાતરૂપં સમુત્પન્નમિતિ । ઇતશ્ચાત્માઽસ્તિ ત્રિગુણાદિવિપર્યયાત્ યદુક્તં પૂર્વસ્યામાર્યાયાં ત્રિગુનમવિવેકિવિષય ઇત્યાદિ । તસ્માદ્વિપર્યયાદ્યેનોક્તં તદ્વિપરીતસ્તથા પુમાન્ । અધિષ્ઠાનાદ્યથેહ લંઘનલ્પવનધાવનસમર્થૈરશ્વૈર્યુક્તો રથઃ સારથિનાઽધિષ્ઠિતઃ પ્રવર્ત્તતે તથાત્માઽધિષ્ઠાનાચ્છરીરમિતિ । તથા ચોક્તં ષષ્ઠિતન્ત્રે પુરુષાધિષ્ઠિતં પ્રધાનં પ્રવર્ત્તતે । અતોઽસ્ત્યાત્માભોક્તૃત્વાત્ । યથા

મધુરામ્લલવણકટુતિક્તકષાયષડ્રસોપબૃંહિતસ્ય સંયુક્તસ્યાન્નસ્ય સાધ્યતે એવં મહદાદિલિઙ્ગસ્ય ભોક્તૃત્વાભાવાદસ્તિ સ આત્મા યસ્યેદં ભોગ્યં શરીરમ્તિ । ઇતશ્ચ કૈવલ્યાર્થમ પ્રવૃત્તેશ્ચ કેવલસ્ય ભાવઃ કૈવલ્યં તન્નિમિતં યા ચ પ્રવૃત્તિસ્તસ્યાઃ સ્વકૈવલ્યાર્થં પ્રવૃત્તઃ સકાશાદનુમીયતે અસ્ત્યાત્મેતિ યતો સર્વો વિદ્વાનવિદ્વાંશ્ચ સંસારસન્તાનક્ષયમિચ્છતિ । એવમેભિર્હેતુભિરસ્ત્યાત્મા શરીરાદ્વ્યતિરિક્તઃ । અથ સ કિમેકહ સર્વશરીરેઽધિષ્ઠાતા મણિરસનાત્મકસૂત્રવત્ આહોસ્વિદ્બહવ આત્માનઃ પ્રતિશરીરમધિષ્ઠાતાર ઇત્યત્રોચ્યતે ।

જન્મમરણકરણાનાં પ્રતિનિયમાદયુગપત્પ્રવૃત્તેશ્ચ ।
પુરુષબહુત્વં સિદ્ધં ત્રૈગુણ્યવિપર્યયાચ્ચૈવ ॥ ૧૮॥

ગૌડપાદભાષ્ય

જન્મ ચ મરણં ચ કરણાનિ ચ જન્મમરણકરણાનિ તેષાં પ્રતિનિયમાત્ પ્રત્યેકનિયમાદિત્યર્થઃ । યદ્યેક એવ આત્મા સ્યાત્તત એકસ્ય જન્મનિ સર્વ એવ જાયેરન્ એકસ્ય મરણે સર્વેઽપિ મ્રિયેરન્ એકસ્ય કરણવૈકલ્યે બાધિર્યાન્ધમૂકત્વકુણત્વખંજત્વલક્ષણે સર્વેઽપિ બધિરાન્ધકુણિખંજાઃ સ્યુર્ન ચૈવં ભવતિ તસ્માજ્જન્મમરણકરણાનાં પ્રતિનિયમાત્ પુરુષબહુત્વં સિદ્ધમ્ । ઇતશ્ચાયુગપત્ પ્રવૃત્તેશ્ચ યુગપદેકકાલં ન યુગપદયુગપત્ પ્રવર્ત્તનં યસ્માદયુગપદ્ધર્માદિષુ પ્રવૃત્તિર્દૃશ્યતે એકે ધર્મે પ્રવૃત્તા અન્યેઽધર્મે વૈરાગ્યેઽન્યે જ્ઞાનેઽન્યે પ્રવૃત્તાઃ તસ્માદયુગપત્ પ્રવૃત્તેશ્ચ બહવ ઇતિ સિદ્ધમ્ । કિઞ્ચાન્યત્ત્રૈગુણ્યાવિપર્યયાચ્ચૈવ ત્રિગુણભાવવિપર્યયાચ્ચ પુરુષબહુત્વં સિદ્ધમ્ । યથા સામાન્યે જન્મનિ એકઃ સાત્ત્વિકઃ સુખી । અન્યો રાજસો દુઃખી । અન્યસ્તામસો મોહવાન્ । એવં ત્રૈગુણ્યવિપર્યયાદ્બહુત્વં સિદ્ધમિતિ । અકર્ત્તા પુરુષ ઇત્યેતદુચ્યતે ।

તસ્માચ્ચ વિપર્યાસાત્સિદ્ધં સાક્ષિત્વમસ્ય પુરુષસ્ય ।
કૈવલ્યં માધ્યસ્થ્યં દ્રષ્ટૃત્વમકર્તૃભાવશ્ચ ॥ ૧૯॥

ગૌડપાદભાષ્ય

તસ્માચ્ચ વિપર્યાસાત્તસ્માચ્ચ યથોક્તત્રૈગુણ્યવિપર્યાસાદ્વિપર્યયાન્નિર્ગુણઃ પુરુષો વિવેકી ભોક્તેત્યાદિગુણાનાં પુરુષસ્ય યો વિપર્યાસ ઉક્તસ્તસ્માત્ સત્ત્વરજસ્તમઃસુ કર્ત્તૃભૂતેષુ સાક્ષિત્વં સિદ્ધં પુરુષસ્યેતિ યોઽયમધિકૃતો બહુત્વં પ્રતિ । ગુણા એવ કર્ત્તારઃ પ્રવર્ત્તન્તે

સાક્ષી ન પ્રવત્તતે નાપિ નિવર્ત્તત એવ । કિંચાન્યત્ કૈવલ્યં
કેવલભાવઃ કૈવલ્યમન્યત્વમિત્યર્થઃ । ત્રિગુણેભ્યઃ કેવલઃ ।
અન્યન્માધ્યસ્થ્યં મધ્યસ્થભાવઃ પરિવ્રાજકવત્ મધ્યસ્થઃ પુરુષઃ ।
યથા કશ્ચિત્ પરિવ્રાજકો ગ્રામીણેષુ કર્ષણાર્થેષુ પ્રવૃત્તેષુ
કેવલો મધ્યસ્થઃ પુરુષોઽપ્યેવં ગુણેષુ વર્ત્તમાનેષુ ન પ્રવર્ત્તતે ।
તસ્માદ્દ્રષ્ટૃત્વમકર્ત્તૃભાવાશ્ચ યસ્માન્મધ્યસ્થસ્તસ્માદ્દ્રષ્ટા
તસ્માદકર્ત્તા પુરુષસ્તેષાં કર્મણામિતિ સત્ત્વરજસ્તમાંસિ ત્રયો ગુણાઃ
કર્મકર્ત્તૃભાવેન પ્રવર્ત્તન્તે ન પુરુષ એવં પુરુષસ્યાસ્તિત્વં ચ સિદ્ધમ્ ।
યસ્માત્કર્ત્તા પુરુષસ્તત્કથમધ્યવસાયં કરોતિ ધર્મં કરિષ્યામ્યધર્મં
ન કરિષ્યામીત્યતઃ કર્ત્તા ભવતિ ન ચ કર્ત્તા પુરુષ એવમુભયાત્ર દોષઃ
સ્યાદિતિ । અત ઉચ્યતે ।

તસ્માત્તત્સંયોગાદચેતનં ચેતનાવદિવ લિઙ્ગમ્ ।
ગુણકર્તૃત્વેઽપિ તથા કર્તેવ ભવત્યુદાસીનઃ ॥ ૨૦॥

ગૌડપાદભાષ્ય

ઇહ પુરુષશ્ચેતનાકૃત્ તેન ચેતનાવભાસં યુક્તં મહદાદિલિઙ્ગં
ચેતનાવદિવ ભવતિ યથા લોકે ઘટાઃ શીતસંયુક્તઃ શીત ઉષ્ણસંયુક્ત
ઉષ્ણ એવં મહદાદિ લિઙ્ગં તસ્ય સંયોગાત્ પુરુષસંયોગાચ્ચેતનાવદિવ
ભવતિ તસ્માદ્ગુણા અધ્યવસાયં કુર્વન્તિ ન પુરુષઃ । યદ્યપિ લોકે પુરુષઃ
કર્ત્તા ગંતેત્યાદિ પ્રયુજ્યતે તથાપ્યકર્ત્તા પુરુષઃ કથં ગુણકર્ત્તૃત્વે
ચ તથા કર્ત્તેવ ભવત્યુદાસીનો ગુણાનાં કર્ત્તૃત્વે સતિ ઉદાસીનોઽપિ પુરુષઃ
કર્ત્તેવ ભવતિ ન કર્ત્તા । અત્ર દૃષ્ટાન્તો ભવતિ યથાઽચૌરશ્ચૌરૈઃ
સહ ગૃહીતશ્ચૌર ઇત્યવગમ્યત એવં ત્રયો ગુણાઃ કર્ત્તારસ્તૈઃ સંયુક્તઃ
પુરુષોઽકર્ત્તાઽપિ કર્ત્તા ભવતિ કર્ત્તૃસંયોગાત્ । એવં વ્યક્તાવ્યક્તજ્ઞાનાં
વિભાગો વિખ્યાતો યદ્વિભાગાન્મોક્ષપ્રાપ્તિરિતિ । અથૈતયોઃ પ્રધાનપુરુષયોઃ
કિં હેતુઃ સંઘાત ઉચ્યતે ।

પુરુષસ્ય દર્શનાર્થં કૈવલ્યાર્થં તથા પ્રધાનસ્ય ।
પઙ્ગ્વન્ધવદુભયોરપિ સંયોગસ્તત્કૃતઃ સર્ગઃ ॥ ૨૧॥

ગૌડપાદભાષ્ય

પુરુષસ્ય પ્રધાનેન સહ સંયોગો દર્શનાર્થં પ્રકૃતિં
મહદાદિકાર્યભૂતપર્યન્તં પુરુષઃ પશ્યતિ એતદર્થં પ્રધાનસ્યાપિ

પુરુષેણ સંયોગઃ । કૈવલ્યાર્થં સ ચ સંયોગઃ પઙ્ગ્વન્ધવદુભયોરપિ દ્રષ્ટવ્યઃ યથા એકઃ પઙ્ગુરેકશ્ચાન્ધ એતૌ દ્વાવપિ ગચ્છન્તૌ મહતા સામર્થ્યેનાટવ્યાં સાર્થસ્ય સ્તેનકૃતાદુપપ્લવાત્ સ્વબન્ધુપરિત્યક્તો દૈવાદિતશ્ચેરુશ્ચ સ્વગત્યા ચ તૌ સંયોગમુપયાતૌ પુનસ્તયોઃ સ્વવચસો વિશ્વસ્તત્વેન સંયોગો ગમનાર્થં દર્શનાર્થં ચ ભવત્યન્ધેન પંગુઃ સ્કન્ધમારોપિતઃ એવં શરીરારૂઢપંગુદર્શિતેન માર્ગેણાન્ધો યાતિ પંગુશ્ચાન્ધસ્કન્ધારૂઢઃ । એવં પુરુષે દર્શનશક્તિરસ્તિ પંગુવન્નક્રિયા પ્રધાને ક્રિયાશક્તિરસ્ત્યન્ધવન્નદર્શનશક્તિઃ । યથા વાનયોઃ પંગ્વન્ધયોઃ કૃતાર્થયોર્વિભાગો ભવિષ્યતીપ્સિતસ્થાનપ્રાપ્તયોરેવં પ્રધાનમપિ પુરુષસ્ય મોક્ષં કૃત્વા નિવર્ત્તતે પુરુષોઽપિ પ્રધાનં દૃષ્ટ્વા કૈવલ્યં ગચ્છતિ તયોઃ કૃતાર્થયોર્વિભાગો ભવિષ્યતિ । કિં ચાન્યત્ તત્કૃતઃ સર્ગસ્તેન સંયોગેન કૃતસ્તત્કૃતઃ સર્ગઃ સૃષ્ટિઃ । યથા સ્ત્રી પુરુષસંયોગાત્ સુતોત્પત્તિસ્તતઃ પ્રધાનપુરુષસંયોગાત્ સર્ગસ્યોત્પત્તિઃ । ઇદાનીં સર્વવિભાગદર્શનાર્થમાહ ।

પ્રકૃતેર્મહાંસ્તતોઽહઙ્કારસ્તસ્માદ્ગણશ્ચ ષોડશકઃ ।
તસ્માદપિ ષોડશકાત્પઞ્ચભ્યઃ પઞ્ચ ભૂતાનિ ॥ ૨૨॥

ગૌડપાદભાષ્ય

પ્રકૃતિઃ પ્રધાનં બ્રહ્મ અવ્યક્તં બહુધાનકં માયેતિ પર્યાયાઃ । અલિઙ્ગસ્યાઃ પ્રકૃતેઃ સકાશાન્મહાનુત્પદ્યતે મહાન્ બુદ્ધિરાસુરી મતિઃ ખ્યાતિર્જ્ઞાનં પ્રજ્ઞાપર્યાયૈરુત્પદ્યતે તસ્માચ્ચ મહતોઽહંકાર ઉત્પદ્યતેઽહંકારો ભૂતાદિવૈકૃતસ્તૈજસોઽભિમાન ઇતિ પર્યાયાઃ તસ્માદ્ગણશ્ચ ષોડશકઃ તસ્માદહંકારાચ્છોડશકઃ ષોડશસ્વરૂપેણ ગુણ ઉત્પદ્યતે । સ યથા । પઞ્ચતન્માત્રાણિ શબ્દતન્માત્રં સ્પર્શતન્માત્રં રુપતન્માત્રં રસતન્માત્રં ગન્ધતન્માત્રમિતિ । તન્માત્રસૂક્ષ્મપર્યાયવાચ્યાનિ । તત એકાદશેન્દ્રિયાણિ શ્રોત્રં ત્વક્ ચક્ષુષી જિહ્વા ઘ્રાણમિતિ પઞ્ચ બુદ્ધીન્દ્રિયાણિ । વાક્પાણિપાદપાયૂપસ્થાઃ પઞ્ચકર્મેન્દ્રિયાણ્યુભયાત્મકમેકાદશં મન એષ ષોડશકો ગણોઽહંકારાદુત્પદ્યતે । કિંચ પઞ્ચભ્યઃ પઞ્ચ ભૂતાનિ તસ્માચ્છોડશકાદ્ગણાત્ પઞ્ચભ્યસ્તન્માત્રેભ્યઃ સકાશાત્ પઞ્ચ વૈ મહાભૂતાન્યુત્પદ્યન્તે । યદુક્તં શબ્દતન્માત્રાદાકાશં સ્પર્શતન્માત્રાદ્વાયુઃ રૂપતન્માત્રાત્તેજઃ રસતન્માત્રાદાપઃ ગન્ધતન્માત્રાત્ પૃથિવી એવં પઞ્ચભ્યઃ પરમાણુભ્યઃ પઞ્ચમહાભૂતાન્યુત્પદ્યન્તે ।

યદુક્તં વ્યક્તાવ્યક્તજ્ઞવિજ્ઞાનાન્મોક્ષ ઇતિ તત્ર મહદાદિભૂતાન્તં
ત્રયોવિંશતિભેદં વ્યાખ્યાતમવ્યક્તમપિ ભેદાનાં પરિમાણાદિત્યાદિના વ્યાખ્યાતં
પુરુષોઽપિ સંઘાતપરાર્થત્વાદિત્યાદિભિર્હેતુભિર્વ્યાખ્યાતઃ । એવમેતાનિ
પઞ્ચવિંશતિતત્ત્વાનિ યસ્ત્રૈલોક્યં વ્યાપ્તં જાનાતિ તસ્ય ભાવોઽસ્તિત્વં
તત્ત્વં યથોક્તમ્ ।
પઞ્ચવિંશતિતત્ત્વજ્ઞો યત્ર તત્રાશ્રમે રતઃ ।
જટી મુણ્ડી શિખી વાઽપિ મુચ્યતે નાત્ર સંશયઃ ।
તાનિ યથા પ્રકૃતિઃ પુરુષો બુદ્ધિરહંકારઃ પઞ્ચતન્માત્રા
એકાદશેન્દ્રિયાણિ પઞ્ચમહાભૂતાનિ ઇત્યેતાનિ પઞ્ચવિંશતિતત્ત્વાનિ ।
તત્રોક્તં પ્રકૃતેર્મહાનુત્પદ્યતે તસ્ય મહતઃ કિં લક્ષણમિત્યેતદાહ ।

અધ્યવસાયો બુદ્ધિર્ધર્મો જ્ઞાનં વિરાગ ઐશ્વર્યમ્ ।
સાત્ત્વિકમેતદ્રૂપં તામસમસ્માદ્વિપર્યસ્તમ્ ॥ ૨૩॥

ગૌડપાદભાષ્ય

અધ્યવસાયો બુદ્ધિલક્ષણમ્ । અધ્યવસનમધ્યવસાયઃ
યથા બીજે ભવિષ્યદ્વૃત્તિકોઽઙ્કુરસ્તદ્વદધ્યવસાયોઽયં
ઘટોઽયં પટ ઇત્યેવં સ્યતિ યા સા બુદ્ધિરિતિ લક્ષ્યતે સા ચ
બુદ્ધિરષ્ટાઙ્ગિકા સાત્ત્વિકતામસરૂપભેદાત્ તત્ર બુદ્ધેઃ સાત્ત્વિકં
રૂપં ચતુર્વિધં ભવતિ ધર્મો જ્ઞાનં વૈરાગ્યમૈશ્વર્યં ચેતિ
તત્ર ધર્મો નામ દયાદાનયમનિયમલક્ષણસ્તત્ર યમા નિયમાશ્ચ
પાતઞ્જલેઽભિહિતા અહિંસાસત્યાસ્તેયબ્રહ્મચર્યાપરિગ્રહા યમાઃ
શૌચસંતોષતપઃસ્વાધ્યાયેશ્વરપ્રણિધા નિયમાઃ । જ્ઞાનં
પ્રકાશોઽવગમો ભાનમિતિ પર્યાયાસ્તચ્ચ દ્વિવિધં બાહ્યમાભ્યન્તરં
ચેતિ તત્ર બાહ્યં નામ વેદાઃ શિક્ષા કલ્પો વ્યાકરણં નિરુક્તં
છન્દોજ્યોતિષાખ્યષડઙ્ગસહિતાઃ પુરાણાનિ ન્યાયમીમાંસાધર્મશાસ્ત્રાણિ ચેતિ ।
આભ્યન્તરં પ્રકૃતિપુરુષજ્ઞાનમિયં પ્રકૃતિઃ સત્ત્વરજસ્તમસાં
સામ્યાવસ્થાઽયં પુરુષઃ સિદ્ધો નિર્ગુણોવ્યાપી ચેતન ઇતિ । તત્ર
બાહ્યજ્ઞાનેન લોકપંક્તિર્લોકાનુરાગ ઇત્યર્થઃ । આભ્યન્તરેણ જ્ઞાનેન
મોક્ષ ઇત્યર્થઃ વૈરાગ્યમપિ દ્વિવિધં બાહ્યમાભ્યન્તરં ચ બાહ્યં
દૃષ્ટવિષયવૈતૃષ્ણ્યમર્જનરક્ષણક્ષયસંગહિંસાદોષદર્શનાત્
વિરક્તસ્યાભ્યન્તરં પ્રધાનમપ્યત્ર સ્વપ્નેન્દ્રજાલસદૃશમિતિ
વિરક્તસ્ય ગોક્ષેપ્સોર્યદુત્પદ્યતે તદાભ્યન્તરં વૈરાગ્યમ્ ।

ઐશ્વર્યમીશ્વરભાવસ્તચ્ચાષ્ટગુણમણિમા મહિમા ગરિમા લઘિમા પ્રાપ્તિઃ
પ્રાકામ્યમીશિત્વં વશિત્વં યત્રકામાવસાયિત્વં ચેતિ । અણોર્ભાવોઽણિમા
સૂક્ષ્મો ભૂત્વા જગતિ વિચરતીતિ । મહિમા મહાન્ ભૂત્વા વિચરતીતિ ।
લઘિમા મૃણાલીતૂલાવયવાદપિ લઘુતયા પુષ્પકેસરાગ્રેષ્વપિ
તિષ્ઠતિ । પ્રાપ્તિરભિમતં વસ્તુ યત્ર તત્રાવસ્થિતઃ પ્રાપ્નોતિ ।
પ્રાકામ્યં પ્રકામતો યદેવેષ્યતિ તદેવ વિદધાતિ । ઈશિત્વં
પ્રભુતયા ત્રૈલોક્યમપીષ્ટે । વશિત્વં સર્વં વશીભવતિ । યત્ર
કામાવસાયિત્વં બ્રહ્માદિસ્તમ્બપર્યન્તં યત્ર કામસ્તત્રૈવાસ્ય સ્વેચ્છયા
સ્થાનાસનવિહારાનાચરતીતિ । ચત્વાર એતાનિ બુદ્ધેઃ સાત્ત્વિકાનિ રૂપાણિ યદા
સત્ત્વેન રજસ્તમસી અભિભૂતે તદા પુમાન્ બુદ્ધિગુણાન્ ધર્માદીનાપ્નોતિ ।
કિંચાન્યત્ તામસમસ્માદ્વિપર્યસ્તમસ્માદ્ધર્માદિર્વિપરીતં તામસં
બુદ્ધિરૂપં ધર્માદ્વિપરીતોઽધર્મ એવમજ્ઞાનમવૈરાગ્યમાનૈશ્વર્યમિતિ ।
એવં સાત્ત્વિકૈસ્તામસૈઃ સ્વરૂપૈરષ્ટાંગા બુદ્ધિસ્ત્રિગુણાદવ્યક્તાદુત્પદ્યતે ।
એવં બુદ્ધિલક્ષણમુક્તમહંકારલક્ષણમુચ્યતે ।

અભિમાનોઽહઙ્કારસ્તસ્માદ્દ્વિવિધઃ પ્રવર્તતે સર્ગઃ ।
ઐન્દ્રિય એકાદશકસ્તન્માત્રપઞ્ચકશ્ચૈવ ॥ ૨૪॥

ગૌડપાદભાષ્ય

એકાદશકશ્ચ ગણ એકાદશેન્દ્રિયાણિ તથા
તન્માત્રો ગણઃ પઞ્ચકઃ પઞ્ચલક્ષણોપેતઃ
શબ્દતન્માત્રસ્પર્શતન્માત્રરૂપતન્માત્રરસતન્માત્રગન્ધતન્માત્રલક્ષણોપેતઃ
કિં લક્ષણાત્ સર્ગ ઇત્યેતદાહ ।

સાત્ત્વિક એકાદશકઃ પ્રવર્તતે વૈકૃતાદહઙ્કારાત્ ।
ભૂતાદેસ્તન્માત્રઃ સ તામસસ્તૈજસાદુભયમ્ ॥ ૨૫॥

ગૌડપાદભાષ્ય

સત્ત્વેનાભિભૂતે યદા રજસ્તમસી અહંકારે ભવતસ્તદા સોઽહંકારઃ
સાત્ત્વિકસ્તસ્ય ચ પૂર્વાચાર્યૈઃ સંજ્ઞા કૃતા વૈકૃત ઇતિ
તસ્માદ્વિકૃતાદહંકારાદેકાદશક ઇન્દ્રિયગણ ઉત્પદ્યતે । તસ્માત્
સાત્ત્વિકાનિ વિશુદ્ધાનીન્દ્રિયાણિ સ્વવિષયસમર્થાનિ તસ્માદુચ્યતે સાત્ત્વિક
એકાદશક ઇતિ । કિંચાન્યદ્ભૂતાદેસ્તન્માત્રઃ સ તામસઃ તમસાભિભૂતે
સત્ત્વરજસી અહંકારે યદા ભવતઃ સોઽહંકારસ્તામસ ઉચ્યતે તસ્ય

પૂર્વાચાર્યકૃતા સંજ્ઞા ભૂતાદિસ્તસ્માદ્ભૂતાદેરહંકારાત્તન્માત્રઃ પઞ્ચકો ગણ ઉત્પદ્યતે ભૂતાનામાદિભૂતસ્તમોબહુલસ્તેનોક્તઃ સ તામસ ઇતિ । તસ્માદ્ભૂતાદેઃ પઞ્ચતન્માત્રકો ગણઃ કિંચ તૈજસાદુભયં યદારજસાભિભૂતે સત્ત્વતમસી ભવતસ્તદા તસ્માત્ સોઽહંકારસ્તૈજસ ઇતિ સંજ્ઞાં લભતે તસ્માત્તૈજસાદુભયમુત્પદ્યતે । ઉભયમિતિ એકાદશો ગણસ્તન્માત્રઃ પઞ્ચકઃ । યોઽયં સાત્ત્વિકોઽહંકારો વૈકૃતિકો વૈકૃતો ભૂત્વા એકાદશેન્દ્રિયાણ્યુત્પાદયતિ સ તૈજસમહંકારં સહાયં ગૃહ્ણાતિ સાત્ત્વિકો નિષ્ક્રિયઃ સ તૈજસયુક્ત ઇન્દ્રિયોત્પત્તૌ સમર્થઃ તથા તામસોઽહંકારો ભૂતાદિઃ સંજ્ઞિતો નિષ્ક્રિયત્વાત્તૈજસેનાહંકારેણ ક્રિયાવતા યુક્તસ્તન્માત્રાણ્યુત્પાદયતિ તેનોક્તં તૈજસાદુભયમિતિ એવં તૈજસેનાહંકારેણૈન્દ્રિયાણ્યેકાદશ પઞ્ચતન્માત્રાણિ કૃતાનિ ભવન્તિ એકાદશક ઇત્યુક્તઃ યો વૈકૃતાત્ સાત્ત્વિકાદહંકારાદુત્પદ્યતે તસ્ય કા સંજ્ઞેત્યાહ ।

બુદ્ધીન્દ્રિયાણિ ચક્ષુઃશ્રોત્રઘ્રાણરસનસ્પર્શનકાનિ ।
વાક્પાણિપાદપાયૂપસ્થાન્ કર્મેન્દ્રિયાણ્યાહુઃ ॥ ૨૬॥

ગૌડપાદભાષ્ય

ચક્ષુરાદીનિ સ્પર્શનપર્યન્તાનિ બુદ્ધીન્દ્રિયાણ્યુચ્યન્તે । સ્પૃશ્યતે અનેનેતિ સ્પર્શનં ત્વગિન્દ્રિયં તદ્વાચી સિદ્ધઃ સ્પર્શનશબ્દોઽસ્તિ તેનેદં પઠ્યતે સ્પર્શનકાનીતિ શબ્દસ્પર્શરૂપરસગન્ધાન્ પઞ્ચવિષયાન્ બુધ્યન્તે અવગચ્છન્તીતિ પઞ્ચ બુદ્ધીન્દ્રિયાણિ । વાક્પાણિપાદપાયૂપસ્થાન્ કર્મેન્દ્રિયાણ્યાહુઃ કર્મ કુર્વન્તીતિ કર્મેન્દ્રિયાણિ । તત્ર વાગ્વદતિ હસ્તૌ નાનાવ્યાપારં કુરુતઃ પાદૌ ગમનાગમનં પાયુરુત્સર્ગં કરોતિ ઉપસ્થ આનંદં પ્રજોત્પત્ત્યા । એવં બુદ્ધીન્દ્રિયકર્મેન્દ્રિયભેદેન દશેન્દ્રિયાણિ વ્યાખ્યાતાનિ મન એકાદશકં કિમાત્મકં કિં સ્વરૂપં ચેતિ તદુચ્યતે ।

ઉભયાત્મકમત્ર મનઃ સઙ્કલ્પકમિન્દ્રિયં ચ સાધર્મ્યાત્ ।
ગુણપરિણામવિશેષાન્નાનાત્વં બાહ્યભેદાશ્ચ ॥ ૨૭॥

ગૌડપાદભાષ્ય

અત્રેન્દ્રિયવર્ગે મન ઉભયાત્મકં બુદ્ધીન્દ્રિયેષુ બુદ્ધીન્દ્રિયવત્ કર્મેન્દ્રિયેષુ કર્મેન્દ્રિયવત્ કસ્માદ્બુદ્ધીન્દ્રિયાણાં પ્રવૃત્તિં કલ્પયતિ કર્મેન્દ્રિયાણાં ચ તસ્માદુભયાત્મકં મનઃ સંકલ્પયતીતિ

સંકલ્પકમ્ । કિંચાન્યદિન્દ્રિયં ચ સાધર્મ્યાત્ સમાનધર્મભાવાત્
સાત્ત્વિકાહંકારાદ્બુદ્ધીન્દ્રિયાણિ કર્મેન્દ્રિયાણિ મનસા સહોત્પદ્યમાનાનિ મનસઃ
સાધર્મ્યં પ્રતિ તસ્માત્સાધર્મ્યાન્મનોઽપીન્દ્રિયમેવમેતાન્યેકાદશેન્દ્રિયાણિ
સાત્ત્વિકાદ્વૈકૃતાદહંકારાદુત્પન્નાનિ । તત્ર મનસઃ કા વૃત્તિરિતિ ।
સંકલ્પો વૃત્તિઃ । બુદ્ધીન્દ્રિયાણાં શબ્દાદયો વૃત્તયઃ કર્મેન્દ્રિયાણાં
વચનાદયોઽથૈતાનીન્દ્રિયાણિ ભિન્નાનિ ભિન્નાર્થગ્રાહકાણિ
કિમીશ્વરેણોત સ્વભાવેન કૃતાનિ યતઃ પ્રધાનબુદ્ધ્યહંકારા
અચેતનાઃ પુરુષોઽપ્યકર્ત્તેત્યત્રાહ । ઇહ સાંખ્યાનાં સ્વભાવો
નામ કશ્ચિત્કારણમસ્તિ । અત્રોચ્યતે ગુણપરિણામવિશેષાન્નાનાત્વં
બાહ્યભેદાશ્ચ । ઇમાન્યેકાદશેન્દ્રિયાણિ શબ્દસ્પર્શરૂપરસગન્ધાઃ
પઞ્ચાનાં વચનાદાનવિહરણોત્સર્ગાનન્દાશ્ચ પઞ્ચાનાં સંકલ્પશ્ચ
મનસ એવમેતે ભિન્નાનામેવેન્દ્રિયાણામર્થાઃ ગુણપરિણામવિશેષાત્ ગુણાનાં
પરિણામો ગુણપરિણામસ્તસ્ય વિશેષાદિન્દ્રિયાણાં નાનાત્વં બાહ્યાર્થભેદાશ્ચ ।
અથૈતન્નાનાત્વં નેશ્વરેણ નાહંકારેણ ન બુદ્ધ્યા ન પ્રધાનેન ન
પુરુષેણ સ્વભાવાત્ કૃતગુણપરિણામેનેતિ । ગુણાનામચેતનત્વાન્ન પ્રવર્ત્તતે
પ્રવર્ત્તત એવ કથં વક્ષ્યતીહૈવ વત્સવિવૃદ્ધિનિમિત્તં ક્ષીરસ્ય યથા
પ્રવૃત્તિરજ્ઞસ્ય પુરુષસ્ય વિમોક્ષાર્થં તથા પ્રવૃત્તિઃ પ્રધાનસ્ય ।
એવમચેતનગુણાઃ એકાદશેન્દ્રિયભાવેન પ્રવર્ત્તન્તે વિશેષા અપિ તત્કૃતા એવ
યેનોચ્ચૈઃ પ્રદેશે ચક્ષુઃખલોકનાય સ્થિતં તથા ઘ્રાણં તથા શ્રોત્રં
તથા જિહ્વા સ્વદેશે સ્વાર્થગ્રહણાય । એવં કર્મેન્દ્રિયાણ્યપિ યથાયથં
સ્વાર્થસમર્થાનિ સ્વદેશાવસ્થિતાનિ સ્વભાવતો ગુણપરિણામવિશેષાદેવ ન
તદર્થા અપિ યત ઉક્તં શાસ્ત્રાન્તરે । ગુણા ગુણેષુ વર્ત્તન્તે ગુણાનાં યા
વૃત્તિઃ સા ગુણવિષયા એવેતિ બાહ્યાર્થા વિજ્ઞેયા ગુણકૃતા એવેત્યર્થઃ ।
પ્રધાનં યસ્ય કારણમિતિ । અથેન્દ્રિયસ્ય કસ્ય કા વૃત્તિરિત્યુચ્યતે ।

શબ્દાદિષુ પઞ્ચાનામાલોચનમત્રમિષ્યતે વૃત્તિઃ ।
વચનાદાનવિહરણોત્સર્ગાનન્દાશ્ચ પઞ્ચાનામ્ ॥ ૨૮॥

ગૌડપાદભાષ્ય

માત્રશબ્દો વિશેષાર્થઃ । અવિશેષવ્યાવૃત્ત્યર્થો યથા ભિક્ષા માત્રં
લભ્યતે નાન્યો વિશેષ ઇતિ । તથ ચક્ષૂ રૂપમત્રે ન રસાદિષુ એવં
શેષાણ્યપિ તદ્યથા ચક્ષુષો રૂપં જિહ્વાયા રસો ઘ્રાણસ્ય ગન્ધઃ શ્રોત્રસ્ય
શબ્દઃ ત્વચઃ સ્પર્શઃ । એવમેષાં બુદ્ધીન્દ્રિયાણાં વૃત્તિઃ કથિતા

કર્મેન્દ્રિયાણાં વૃત્તિઃ કથ્યતે વચનાદાનવિહરણોત્સર્ગાનન્દાશ્ચ પઞ્ચાનાં કર્મેન્દ્રિયાણામિત્યર્થઃ । વાચો વચનં હસ્તયોરાદાનં પાદયોર્વિહરણં પાયોર્ભુક્તસ્યાહારસ્ય પરિણતમલોત્સર્ગઃ ઉપસ્થસ્યાનન્દઃ સુતોત્પત્તિર્વિષયા વૃત્તિરિતિ સમ્બન્ધઃ । અધુના બુદ્ધ્યહંકારમનસામુચ્યતે ।

સ્વાલક્ષણ્યા વૃત્તિસ્ત્રયસ્ય સૈષા ભવત્યસામાન્યા ।
સામાન્યકરણવૃત્તિઃ પ્રાણાદ્યા વાયવઃ પઞ્ચ ॥ ૨૯॥

ગૌડપાદભાષ્ય

સ્વલક્ષણસ્વભાવા સ્વાલક્ષણ્યા । અધ્યવસાયો યો બુદ્ધિરિતિ લક્ષણમુક્તં સૈવ બુદ્ધિવૃત્તિઃ । તથાઽભિમાનોઽહંકાર ઇત્યભિમાનલક્ષણોઽભિમાનવૃત્તિશ્ચ । સંકલ્પકં મન ઇતિ લક્ષણમુક્તં તેન સંકલ્પ એવ મનસો વૃત્તિઃ । ત્રયસ્ય બુદ્ધ્યહંકારમનસાં સ્વાલક્ષણ્યા વૃત્તિરસામાન્યા યા પ્રાગભિહિતા બુદ્ધીન્દ્રિયાણાં ચ વૃત્તિઃ સાઽપ્યસામાન્યૈવેતિ । ઇદાનીં સામાન્યા વૃત્તિરાખ્યાયતે । સામાન્યકારનવૃત્તિઃ સામાન્યેન કરણાનાં વૃત્તિઃ પ્રાણાદ્યા વાયવઃ પઞ્ચ પ્રાણાપાનસમાનોદાનવ્યાના ઇતિ પઞ્ચ વાયવઃ સર્વેન્દ્રિયાણાં સામાન્યા વૃત્તિર્યતઃ । પ્રાણો નામ વાયુર્મુખનાસિકાન્તર્ગોચરસ્તસ્ય યત્ સ્પન્દનં કર્મ તત્ ત્રયોદશવિધસ્યાપિ સામાન્યા વૃત્તિઃ સતિ પ્રાણે યસ્માત્ કરણાનામાત્મલાભ ઇતિ । પ્રાણોઽપિ પઞ્ચરશકુનિવત્ સર્વસ્ય ચલનં કરોતીતિ । પ્રાણનાત્ પ્રાણ ઇત્યુચ્યતે । તથાઽપનયનાદપાનસ્તત્ર યત્સ્પન્દનં તદપિ સામાન્યવૃત્તિરિન્દ્રિયસ્ય । તથા સમાનો મધ્યદેશવર્તી ય આહારાદિનયનાત્સમં નયનાત્ સમાનો વાયુસ્તત્ર યત્સ્પન્દનં તત્ સામાન્યં કરણવૃત્તિઃ । તથા ઊર્ધ્વારોહણાદુત્કર્ષાદુન્નયનાદ્વા ઉદાનો નાભિદેશમસ્તકાન્તર્ગોચરસ્તત્રોદાને યત્સ્પન્દનં તત્ સર્વેન્દ્રિયાણાં સામાન્યા વૃત્તિઃ । કિંચ શરીરવ્યાપ્તિરભ્યન્તરવિભાગશ્ચ યેન ક્રિયતેઽસૌ શરીરવ્યાપ્ત્યાકાશવદ્વ્યાનસ્તત્ર યત્ સ્પન્દનં તત્ કરણજાલસ્ય સામાન્યા વૃત્તિરિતિ । એવમેતે પઞ્ચ વાયવઃ સામાન્યકરણવૃત્તિરિતિ વ્યાખ્યાતાઃ ત્રયોદશવિધસ્યાપિ કરણસામાન્યા વૃત્તિરિત્યર્થઃ ।

યુગપચ્ચતુષ્ટયસ્ય તુ વૃત્તિઃ ક્રમશશ્ચ તસ્ય નિર્દિષ્ટા ।
દૃષ્ટે તથાપ્યદૃષ્ટે ત્રયસ્ય તત્પૂર્વિકા વૃત્તિઃ ॥ ૩૦॥

ગૌડપાદભાષ્ય

યુગપચ્ચતુષ્ટયસ્ય બુદ્ધ્યહંકારમનસામેકૈકેન્દ્રિયસમ્બન્ધે સતિ ચતુષ્ટયં ભવતિ ચતુષ્ટયસ્ય દૃષ્ટે પ્રતિવિષયાધ્યવસાયે યુગપદ્વૃત્તિર્બુદ્ધ્યહંકારમનશ્ચક્ષૂંષિ યુગપદેકકાલં રૂપં પશ્યતિ સ્થાણુરયમિતિ । બુદ્ધ્યહંકારમનોજિહ્વા યુગપદ્રસં ગૃહ્ણન્તિ । બુદ્ધ્યહંકારમનોઘ્રાણાનિ યુગપદ્ગન્ધં ગૃહ્ણન્તિ । તથા ત્વક્શ્રોત્રે અપિ । કિંચ ક્રમશશ્ચ તસ્ય નિર્દિષ્ટા તસ્યેતિ ચતુષ્ટયસ્યક્રમશશ્ચ વૃત્તિર્ભવતિ । યથા કશ્ચિત્ પથિ ગચ્છન્ દૂરાદેવ દૃષ્ટ્વા સ્થાણુરયં પુરુષો વેતિ સંશયે સતિ તત્રોપરૂઢાં વલ્લિં તલ્લિઙ્ગં પશ્યતિ શકુનિં વા તતો તસ્ય મનસા સંકલ્પિતે સંશયે વ્યવચ્છેદભૂતા બુદ્ધિર્ભવતિ સ્થાણુરયમિત્યતોઽહંકારશ્ચ નિશ્ચયાર્થઃ સ્થાણુરેવેત્યેવં બુદ્ધ્યહંકારમનશ્ચક્ષુષાં ક્રમશો વૃત્તિર્દૃષ્ટા યથા રૂપે તથા શબ્દાદિષ્વપિ બોદ્ધવ્યા દૃષ્ટે દૃષ્ટવિષયે । કિંચાન્યત્તથાઽપ્યદૃષ્ટે ત્રયસ્ય તત્પૂર્વિકા વૃત્તિરદૃષ્ટેઽનાગતેઽતીતે ચ કાલે બુદ્ધ્યહંકારમનસાં રૂપે ચક્ષુઃ પૂર્વિકા ત્રયસ્ય વૃત્તિઃ સ્પર્શે ત્વક્પૂર્વિકા ગન્ધે ઘ્રાણપૂર્વિકા રસે રસનપૂર્વિકા શબ્દે શ્રવણપૂર્વિકા બુદ્ધ્યહંકારમનસામનાગતે ભવિષ્યતિ કાલેઽતીતે ચ તત્ ક્રમશો વૃત્તિર્વર્ત્તમાને યુગપત્ ક્રમશશ્ચેતિ ।
કિંચ ।

સ્વાં સ્વાં પ્રતિપદ્યન્તે પરસ્પરાકૂતહેતુકાં વૃત્તિમ્ ।
પુરુષાર્થ એવ હેતુર્ન કેનચિત્કાર્યતે કરણમ્ ॥ ૩૧॥

ગૌડપાદભાષ્ય

સ્વાં સ્વામિતિ વીપ્સા બુદ્ધ્યહંકારમનાંસિ સ્વાં સ્વાં વૃત્તિં પરસ્પરાકૂતહેતુકામાકૂતકાદરાસમ્ભ્રમ ઇતિ પ્રતિપદ્યન્તે પુરુષાર્થકરણાય । બુદ્ધેરહંકારાદયો બુદ્ધિરહંકારાકૂતં જ્ઞાત્વા સ્વસ્વવિષયં પ્રતિપદ્યતે કિમર્થમિતિ ચેત્ પુરુષાર્થ એવ હેતુઃ પુરુષાર્થઃ કર્ત્તવ્ય ઇત્યેવમર્થં ગુણાનાં પ્રવૃત્તિસ્તસ્માદેતાનિ કરણાનિ પુરુષાર્થં પ્રકાશયન્તિ કથં સ્વયં પ્રવર્તન્તે ન કેનચિત્ કાર્યતે કરણં પુરુષાર્થ એવૈકઃ કારયતીતિ વાક્યાર્થો ન કેનચિદીશ્વરેણ પુરુષેણ કાર્યતે પ્રબોધ્યતે કરણમ્ । બુદ્ધ્યાદિ કતિવિધં તદિત્યુચ્યતે ।

કરણં ત્રયોદશવિધં તદાહરણધારણપ્રકાશકરમ્ ।

કાર્યં ચ તસ્ય દશધાહાર્યં ધાર્યં પ્રકાશ્યં ચ ॥ ૩૨ ॥

ગૌડપાદભાષ્ય

કરણં મહદાદિ ત્રયોદશવિધં બોદ્ધ્યવ્યં પઞ્ચબુદ્ધીન્દ્રિયાણિ ચક્ષુરાદીનિ પઞ્ચ કર્મેન્દ્રિયાણિ વાગાદીનીતિ ત્રયોદશવિધં કરણં તત્કિં કરોતીત્યેતદાહ તદાહરણધારણપ્રકાશકરમ્ । તત્રાહરણં ધારણં ચ કર્મેન્દ્રિયાણિ કુર્વન્તિ પ્રકાશં બુદ્ધીન્દ્રિયાણિ । કતિવિધં કાર્યં તસ્યેતિ તદુચ્યતે । કાર્યં ચ તસ્ય દશધા તસ્ય કરણસ્ય કાર્યં કર્તવ્યમિતિ દશધા દશપ્રકારં શબ્દસ્પર્શરૂપરસગન્ધાખ્યં વચનાદાનવિહરણોત્સર્ગાનન્દાખ્યમેતદ્દશવિધં કાર્યં બુદ્ધીન્દ્રિયૈઃ પ્રકાશિતં કર્મેન્દ્રિયાણ્યાહરન્તિ ધારયન્તિ ચેતિ ।

અન્તઃકરણં ત્રિવિધં દશધા બાહ્યં ત્રયસ્ય વિષયાખ્યમ્ ।
સામ્પ્રતકાલં બાહ્યં ત્રિકાલમાભ્યન્તરં કરણમ્ ॥ ૩૩ ॥

ગૌડપાદભાષ્ય

અન્તઃકરણમિતિ બુદ્ધ્યહંકારમનાંસિ ત્રિવિધં મહદાદિભેદાત્ । દશધા બાહ્યં ચ બુદ્ધીન્દ્રિયાણિ પઞ્ચ કર્મેન્દ્રિયાણિ પઞ્ચ દશવિધમેતત્કરણં બાહ્યં તત્ર યસ્યાન્તઃકરણસ્ય વિષયાખ્યં બુદ્ધ્યહંકારમનસાં ભોગ્યં સામ્પ્રતકાલં શ્રોત્રં વર્ત્તમાનમેવ શબ્દં શ◌ૃણોતિ નાતીતં ન ચ ભવિષ્યન્તં ચક્ષુરપિ વર્તમાનં રૂપં પશ્યતિ નાતીતં નાનાગતં ત્વગ્વર્ત્તમાનં સ્પર્શં જિહ્વા વર્ત્તમાનં રસં નાસિકા વર્ત્તમાનં ગન્ધં નાતીતાનાગતં ચેતિ । એવં કર્મેન્દ્રિયાણિ વાગ્વર્ત્તમાનં શબ્દમુચ્ચારયતિ નાતીતં નાનાગતં પાણી વર્ત્તમાનં ઘટમાદદાતે નાતીતમનાગતં પાયૂપસ્થૌ ચ વર્ત્તમાનાવુત્સર્ગાનન્દૌ કુરુતો નાતીતૌ નાનાગતૌ । એવં બાહ્યં કરણં સામ્પ્રતકાલમુક્તં ત્રિકાલમાભ્યન્તરં કરણં બુદ્ધ્યહંકારમનાંસિ ત્રિકાલવિષયાણિ બુદ્ધિર્વર્ત્તમાનં ઘટં બુધ્યતે અતીતમનાગતં ચેતિ । અહંકારો વર્ત્તમાનેઽભિમાનં કરોત્યતીતેઽનાગતે ચ । તથા મનો વર્ત્તમાને સંકલ્પં કુરુતે અતીતેઽનાગતે ચ એવં ત્રિકાલમાભ્યન્તરં કરણમિતિ । ઇદાનીમિન્દ્રિયાણિ કતિ સવિશેષં વિષયં ગૃહ્ણન્તિ કાનિ નિર્વિશેષમિતિ તદુચ્યતે ।

બુદ્ધીન્દ્રિયાણિ તેષાં પઞ્ચ વિશેષાવિશેષવિષયાણિ ।
વાગ્ભવતિ શબ્દવિષયા શેષાન્યપિ પઞ્ચવિષયાણિ ॥ ૩૪ ॥

ગૌડપાદભાષ્ય

બુધ્દ્ધીન્દ્રિયાણિ તાનિ સવિશેષં વિષયં ગૃહ્ણાતિ સવિશેષવિષયં
માનુષાણાં શબ્દસ્પર્શરૂપરસગન્ધાન્ સુખદુઃખમોહવિષયયુક્તાન્
બુધ્દ્ધીન્દ્રિયાણિ પ્રકાશયન્તિ દેવાનાં નિર્વિશેષાન્વિષયાન્ પ્રકાશયન્તિ
તથા કર્મેન્દ્રિયાણાં મધ્યે વાગ્ભવતિ શબ્દવિષયા દેવાનાં માનુષાણાં ચ
વાગ્વદતિ શ્લોકાદીનુચ્ચારયતિ તસ્માદ્દેવાનાં માનુષાણાં ચ વાગિન્દ્રિયં તુલ્યં
શેષાણ્યપિ વાગ્વ્યતિરિક્તાનિ પાણિપાદપાયૂપસ્થસંજ્ઞિતાનિ પઞ્ચવિષયાણિ
શબ્દાદયો યેષાં તાનિ પઞ્ચવિષયાણિ શબ્દસ્પર્શરૂપરસગન્ધાઃ
પાણૌ સન્તિ પઞ્ચશબ્દાદિલક્ષણાયાં ભુવિ પાદો વિહરતિ પાય્વિન્દ્રિયં
પઞ્ચક્લૃપ્તમુત્સર્ગં કરોતિ તથોપસ્થેન્દ્રિયં પઞ્ચલક્ષણં
શુક્રમાનન્દયતિ ।

સાન્તઃકરણા બુધ્દિઃ સર્વં વિષયમવગાહતે યસ્માત્ ।
તસ્માત્ત્રિવિધં કરણં દ્વારિ દ્વારાણિ શેષાણિ ॥ ૩૫ ॥

ગૌડપાદભાષ્ય

સાન્તઃકરણા બુધ્દિરહંકારમનઃસહિતેત્યર્થહ યસ્માત્ સર્વં
વિષયમવગાહતે ગૃહ્ણાતિ ત્રિષ્વપિ કાલેષુ શબ્દાદીન્ ગૃહ્ણાતિ
તસ્માત્ત્રિવિધમ કરણં દ્વારિ દ્વારાણિ શેષાણિ શેષાનિ કરણાનીતિ
વાક્યશેષઃ । કિં ચાન્યત્ ।

એતે પ્રદીપકલ્પાઃ પરસ્પરવિલક્ષણા ગુણવિશેષાઃ ।
કૃત્સ્નં પુરુષસ્યાર્થં પ્રકાશ્ય બુધ્દ્ધૌ પ્રયચ્છન્તિ ॥ ૩૬ ॥

ગૌડપાદભાષ્ય

યાનિ કરણાન્યુક્તાનિ એતે ગુણવિશેષાઃ કિં વિશિષ્ટાઃ પ્રદીપકલ્પાઃ
પ્રદીપવદ્વિષયપ્રકાશકાઃ પરસ્પરવિલક્ષણા અસદૃશા ભિન્નવિષયા
ઇત્યર્થઃ । ગુણવિષયા ઇત્યર્થઃ । ગુણવિશેષા ગુણેભ્યો જાતાઃ । કૃત્સ્નં
પુરુષસ્યાર્થં બુધ્દ્ધીન્દ્રિયાનિ કર્મેન્દ્રિયાણ્યહંકારો મનશ્ચૈતાનિ
સ્વં સ્વમર્થં પુરુષસ્ય પ્રકાશ્ય બુધ્દ્ધૌ પ્રયચ્છન્તિ બુધ્દિસ્થં
કુર્વન્તીત્યર્થઃ । યતો બુધ્દિસ્થં સર્વં વિષયં સુખાદિકં પુરુષ
ઉપલભ્યતે । ઇદં ચાન્યત્ ।

સર્વં પ્રત્યુપભોગં યસ્માત્પુરુષસ્ય સાધયતિ બુધ્દિઃ ।

સૈવ ચ વિશિનષ્ટિ તતઃ પ્રધાનપુરુષાન્તરં સૂક્ષ્મમ્  ॥ ૩૭॥

ગૌડપાદભાષ્ય

સર્વેન્દ્રિયગતં ત્રિષ્વપિ કાલેષુ સર્વં પ્રત્યુપભોગમુપભોગં
પ્રતિ દેવમનુષ્યતિર્યગ્ બુદ્ધીન્દ્રિયકર્મેન્દ્રિયદ્વારેણ સાન્તઃકરણા
બુદ્ધિઃ સાધયતિ સમ્પાદયતિ યસ્માત્ તસ્માત્ સૈવ ચ વિશિનષ્ટિ
પ્રધાનપુરુષયોર્વિષયવિભાગં કરોતિ પ્રધાનપુરુષાન્તરં
નાનાત્વમિત્યર્થઃ । સૂક્ષ્મમિત્યનધિકૃતતપશ્ચરણૈરપ્રાપ્યમિયં
પ્રકૃતિઃ સત્ત્વરજસ્તમસાં સામ્યાવસ્થા ઇયં બુદ્ધિરયમહંકાર એતાનિ
પઞ્ચતન્માત્રાણ્યેકાદશેન્દ્રિયાણિ પઞ્ચમહાભૂતાન્યયમન્યઃ પુરુષ એભ્યો
વ્યતિરિક્ત ઇત્યેવ બોધયતિ બુદ્ધિર્યસ્યાવાયાદપવર્ગો ભવતિ । પૂર્વમુક્તં
વિશેષાવિશેષવિષયાણિ તત્ કે વિષયાસ્તચ્ચ દર્શયતિ ।

તન્માત્રાણ્યવિશેષાસ્તેભ્યો ભૂતાનિ પઞ્ચ પઞ્ચભ્યઃ  ।
એતે સ્મૃતા વિશેષાઃ શાન્તા ઘોરાશ્ચ મૂઢાશ્ચ  ॥ ૩૮॥

ગૌડપાદભાષ્ય

યાનિ પઞ્ચ તન્માત્રાણ્યહંકારાદુત્પદ્યન્તે તે શબ્દતન્માત્રં સ્પર્શતન્માત્રં
રૂપતન્માત્રં રસતન્માત્રં ગન્ધતન્માત્રમેતાન્યવિશેષા ઉચ્યન્તે દેવાનામેતે
સુખલક્ષણા વિષયા દુઃખમોહરહિતાસ્તેભ્યઃ પઞ્ચભ્યસ્તન્માત્રેભ્યઃ
પઞ્ચમહાભૂતાનિ પૃથિવ્યપ્તેજોવાય્વાકાશસંજ્ઞિતાનિ
યાન્યુત્પદ્યન્તે । એતે સ્મૃતા વિશેષાઃ । ગન્ધતન્માત્રાત્
પૃથિવી રસતન્માત્રાદાપો રૂપતન્માત્રાત્તેજઃ સ્પર્શતન્માત્રાદ્વાયુઃ
શબ્દતન્માત્રાદાકાશમિત્યેવમુત્પન્નાન્યેતાનિ મહાભૂતાન્યેતે વિશેષા માનુષાણાં
વિષયાઃ શાન્તા સુખલક્ષણા ઘોરા દુઃખલક્ષણા મૂઢા મોહજનકા યથાકાશં
કસ્યચિદનવકાશાદન્તર્ગૃહાદેર્નિર્ગતસ્ય સુખાત્મકં શાન્તં ભવતિ
તદેવ શીતોષ્ણવાતવર્ષાભિભૂતસ્ય દુઃખાત્મકં ઘોરં ભવતિ તદેવ
પન્થાનં ગચ્છતો વનમાર્ગાત્ ભ્રષ્ટસ્ય દિઙ્ મોહાન્મૂઢં ભવતિ । એવં
વાયુર્ઘર્માર્તસ્ય શાન્તો ભવતિ શીતાર્તસ્ય ઘોરો ધૂલીશર્કરાવિમિશ્રોઽતિવાન્
મૂઢ ઇતિ । એવં તેજઃ પ્રભૃતિષુ દ્રષ્ટવ્યમ્ । અથાન્યે વિશેષાઃ ।

સૂક્ષ્મા માતાપિતૃજાઃ સહ પ્રભૂતૈસ્ત્રિધા વિશેષાઃ સ્યુઃ  ।
સૂક્ષ્માસ્તેષાં નિયતા માતાપિતૃજા નિવર્તન્તે  ॥ ૩૯॥

ગૌડપાદભાષ્ય

સૂક્ષ્માસ્તન્માત્રાણિ યત્સંગૃહીતં તન્માત્રિકં સૂક્ષ્મશરીરં
મહદાદિલિઙ્ગં સદા તિષ્ઠતિ સંસરતિ ચ તે સૂક્ષ્માસ્તથા
માતાપિતૃજા સ્થૂલશરીરોપચાયકા ઋતુકાલે માતાપિતૃસંયોગે
શોણિતશુક્રમિશ્રીભાવેનોદરાન્તઃ સૂક્ષ્મશરીરસ્યોપચયં
કુર્વીત તત્ સૂક્ષ્મશરીરં પુનર્માતુરશિતપીતનાનાવિધરસેન
નાભીનિબન્ધેનાપ્યાયતે તથા પ્રારબ્ધં શરીરં
સૂક્ષ્મૈર્માતાપિતૃજૈશ્ચ સહ મહાભૂતૈસ્ત્રિવિધા વિશેષૈઃ
પૃષ્ઠોદરજંઘાકટ્યુરઃ શિરઃ પ્રભૃતિ ષાટ્ કૌશિકં પઞ્ચભૌતિકં
રુધિરમાંસસ્નાયુશુક્રાસ્થિમજ્જાસંભૃતમાકાશોઽવકાશદાનાદ્વાયુર્વર્દ્ધનાત્
તેજઃ પાકાદાપઃ સંગ્રહાત્પૃથિવી ધારણાત્ સમસ્તાવયવોપેતં
માતુરુદરાદ્બહિર્ભવતિ । એવમેતે ત્રિવિધા વિશેષા સ્યુઃ ।
અત્રાહ કે નિત્યાઃ કે વાઽનિત્યાઃ સૂક્ષ્માસ્તેષાં નિયતાઃ
સૂક્ષ્માસ્તન્માત્રસંજ્ઞકાસ્તેષાં મધ્યે નિયતા નિત્યાસ્તૈરારબ્ધં
શરીરં કર્મવશાત્ પશુમૃગપક્ષિસરીસૃપસ્થાવરજાતિષુ સંસરતિ
ધર્મવશાદિન્દ્રકાદિલોકેષ્વેવમેતન્નિયતં સૂક્ષ્મશરીરં સરતિ
યાવત્ જ્ઞાનમુત્પદ્યતે ઉત્પન્ને જ્ઞાને વિદ્વાંઞ્છરીરં ત્યક્ત્વા મોક્ષં
ગચ્છતિ તસ્માદેતે વિશેષા સૂક્ષ્મા નિત્યા ઇતિ માતાપિતૃજા નિવર્તન્તે તત્
સૂક્ષ્મશરીરં પરિત્યજ્યેહૈવ પ્રાણત્યાગવેલાયાં માતાપિતૃજા નિવર્તન્તે
મરણકાલે માતાપિતૃજં શરીરમિહૈવ નિવર્ત્ત્ય ભૂમ્યાદિષુ પ્રલીયતે
યથા તત્ત્વં સૂક્ષ્મં ચ કથં સંસરતિ તદાહ ।

પૂર્વોત્પન્નમસક્તં નિયતં મહદાદિસૂક્ષ્મપર્યન્તમ્ ।
સંસરતિ નિરુપભોગં ભાવૈરધિવાસિતં લિઙ્ગમ્ ॥ ૪૦॥

ગૌડપાદભાષ્ય

યદા લોકાનુપન્નાઃ પ્રધાનાદિસર્ગે તદા સૂક્ષ્મશરીરમુત્પન્નમિતિ ।
કિંચાન્યદસક્તં ન સંયુક્તં તિર્યગ્યોનિદેવમાનુષસ્થાનેષુ
સૂક્ષ્મત્વાત્ કુત્રચિદસક્તં પર્વતાદિષ્વપ્રતિહતપ્રસરં સર્તિ
ગચ્છતિ । નિત્યં યાવન્નજ્ઞાનમુત્પદ્યતે તાવત્ સંસરતિ તચ્ચ
મહદાદિસૂક્ષ્મપર્યન્તં મહાનાદૌ યસ્ય તન્મહદાદિ બુદ્ધિરહંકારો
મન ઇતિ પઞ્ચ તન્માત્રાણિ સૂક્ષ્મપર્યન્તં તન્માત્રપર્યન્તં સંસરતિ
શૂલગ્રહપિપીલિકાવત્ ત્રીનપિ લોકાન્ । નિરુપભોગં ભોગરહિતં તત્

સૂક્ષ્મશરીરં પિતૃમાતૃજેન બાહ્યેનોપચયેન ક્રિયાધર્મગ્રહણાત્
ભોગેષુ સમર્થં ભવતીત્યર્થઃ । ભાવૈરધિવાસિતં પુરસ્તાદ્ભાવાન્
ધર્માદીન્ વક્ષ્યામસ્તૈરધિવાસિતમુપરંજિતં લિંગમિતિ । પ્રલયકાલે
મહદાદિસૂક્ષ્મપર્યન્તં કરણોપેતં પ્રધાને લીયતે અસંસરણયુક્તં
સદા સર્ગકાલમત્ર વર્ત્તતે પ્રકૃતિમોહબન્ધનબદ્ધં સત્
સંસરણાદિક્રિયાસ્વસમર્થમિતિ પુનઃ સર્ગકાલે સંસરતિ તસ્માલ્લિંગં સૂક્ષ્મમ્ ।
કિં પ્રયોજનેન ત્રયોદશવિધં કરણં સંસરતીત્યેવં ચોદિતે સત્યાહ ।

ચિત્રં યથાશ્રયમૃતે સ્થાણ્વાદિભ્યો યથા વિના છાયા ।
તદ્વદ્વિના વિશેષૈસ્તિષ્ઠતિ ન નિરાશ્રયં લિઙ્ગમ્ ॥ ૪૧॥

ગૌડપાદભાષ્ય

ચિત્રં યથા કુડ્યાશ્રયમૃતે ન તિષ્ઠતિ સ્થાણ્વાદિભ્યઃ કીલકાદિભ્યો
વિના છાયા ન તિષ્ઠતિ તૈર્વિના ન ભવત્યાદિગ્રહણાદ્યથા શૈત્યં વિના
નાપો ભવન્તિ શૈત્યં વાઽદ્ભિર્વિના । અગ્નિરુષ્ણં વિના વાયુઃ સ્પર્શં વિના
આકાશમવકાશં વિના પૃથિવી ગન્ધં વિના તદ્વદેતેન દૃષ્ટાન્તેન
ન્યાયન વિના વિશેષૈરવિશેષૈસ્તન્માત્રૈર્વિના ન તિષ્ઠતિ । અથ
વિશેષભૂતાન્યુચ્યન્તે શરીરં પઞ્ચભૂતમયં વૈશેષિણા શરીરેણ
વિના ક્વ લિઙ્ગસ્થાનં ચેતિ ક્વ એકદેહમુજ્ઝતિ તદેવાન્યમાશ્રયતિ
નિરાશ્રયમાશ્રયરહિતં લિઙ્ગં ત્રયોદશ વિધં કરણમિત્યર્થઃ ।
કિમર્થં તદુચ્યતે ।

પુરુષાર્થહેતુકમિદં નિમિત્તનૈમિત્તિકપ્રસઙ્ગેન ।
પ્રકૃતેર્વિભુત્વયોગાન્નટવદ્વ્યવતિષ્ઠતે લિઙ્ગમ્ ॥ ૪૨॥

ગૌડપાદભાષ્ય

પુરુષાર્થઃ કર્તવ્ય ઇતિ પ્રધાનં પ્રવર્ત્તતે સ ચ દ્વિવિધઃ
શબ્દાદ્યુપલબ્ધિલક્ષણો ગુણપુરુષાન્તરો લબ્ધિલક્ષણશ્ચ ।
શબ્દાદ્યુપલબ્ધિર્બ્રહ્માદિષુ લોકેષુ ગન્ધાદિભોગાવાપ્તિઃ
ગુણપુરુષાન્તરોપલબ્ધિર્મોક્ષ ઇતિ તસમાદુક્તં પુરુષાર્થહેતુકમિદં
સૂક્ષ્મશરીરં પ્રવર્ત્તત ઇતિ । નિમિત્તનૈમિત્તિકપ્રસંગેન નિમિત્તં
ધર્માદિ નૈમિત્તિકમૂર્દ્ધ્વગમનાદિ પુરસ્તાદેવ વક્ષ્યામઃ પ્રસંગેન
પ્રસક્ત્યા પ્રકૃતેઃ પ્રધાનસ્ય વિભુત્વયોગાદ્યથા રાજા સ્વરાષ્ટ્રે
વિભુત્વાદ્યદ્યદિચ્છતિ તત્તત્ કરોતીતિ તથા પ્રકૃતેઃ સર્વત્ર

વિભુત્વયોગાન્નિમિત્તનૈમિત્તકં પ્રસંગેન વ્યવતિષ્ઠતે પૃથક્
પૃથગ્દેહધારણે લિઙ્ગસ્ય વ્યવસ્થાં કરોતિ । લિંગં સૂક્ષ્મઃ
પરમાણુભિસ્તન્માત્રૈરૂપચિતં શરીરં ત્રયોદશવિધકરણોપેતં
માનુષદેવતિર્યગ્યોનિષુ વ્યવતિષ્ઠતે કથં નટવત્ યથા નટઃ પટાન્તરેણ
પ્રવિશ્ય દેવો ભૂત્વા નિર્ગચ્છતિ પુનર્માનુષઃ પુનર્વિદૂષકઃ । એવં લિંગં
નિમિત્તનૈમિત્તિકપ્રસંગેનોદરાન્તઃ પ્રવિશ્ય હસ્તી સ્ત્રી પુમાન્ ભવતિ ।
ભાવૈરધિવાસિતં લિંગં સંસરતીત્યુક્તં તત્ કે ભાવા ઇત્યાહ ।

સાંસિદ્ધિકાશ્ચ ભાવાઃ પ્રાકૃતિકા વૈકૃતાશ્ચ ધર્માદ્યાઃ ।
દૃષ્ટાઃ કરણાશ્રયિણઃ કાર્યાશ્રયિણશ્ચ કલલાદ્યાઃ ॥ ૪૩ ॥

ગૌડપાદભાષ્ય

ભાવાસ્ત્રિવિધાશ્ચિન્ત્યન્તે સાંસિદ્ધિકાઃ પ્રાકૃતા વૈકૃતાશ્ચ । તત્ર
સાંસિદ્ધિકા યથા ભવગતઃ કપિલસ્યાદિસર્ગે ઉત્પદ્યમાનસ્ય ચત્વારો
ભાવાઃ સહોત્પન્નાઃ ધર્મો જ્ઞાનં વૈરાગ્યમૈશ્વર્યમિતિ । પ્રાકૃતાઃ
કથ્યન્તે બ્રહ્મણશ્ચત્વારઃ પુત્રાઃ સનકસનન્દનસનાતનસનત્કુમારા
બભૂવુઃ । તેષામુત્પન્નકાર્યકારણાનાં શરીરિણાં ષોડશવર્ષાણામેતે
ભાવાશ્ચત્વારઃ સમુત્પન્નાસ્તસ્માદેતે પ્રાકૃતાઃ । તથા વૈકૃતા
યથા આચાર્યમૂર્ત્તિં નિમિત્તં કૃત્વાઽસ્મદાદીનાં જ્ઞાનમુત્પદ્યતે
જ્ઞાનાદ્વૈરાગ્યં વૈરાગ્યાદ્ધર્મો ધર્માદૈશ્વર્યમિતિ । આચાર્યમૂર્ત્તિરપિ
વિકૃતિરિતિ તસ્માદ્વૈકૃતા એતે ભાવા ઉચ્યન્તે યૈરધિવાસિતં લિઙ્ગં
સંસરતિ એતે ચત્વારો ભાવાઃ સાત્વિકાસ્તામસાવિપરીતાઃ સાત્ત્વિકમેતદ્રૂપં
તામસમસ્માદ્વિપર્યસ્તમિત્યત્ર વ્યાખ્યાતા એવમષ્ટૌ ધર્મો જ્ઞાનં
વૈરાગ્યમૈશ્વર્યમધર્મોઽજ્ઞાનમવૈરાગ્યમનૈશ્વર્યમિત્યષ્ટૌ ભાવાઃ ।
એતદુક્તમધ્યવસાયો બુદ્ધિઃ ધર્મો જ્ઞાનમિતિ કાર્યં દેહસ્તદાશ્રયાઃ
કલલાદ્યા યે માતૃજા ઇત્યુક્તાઃ શુક્રશોણિતસંયોગે વિવૃદ્ધિહેતુકાઃ કલલાદ્યા
બુદ્બુદમાંસપેશીપ્રભૃતયઃ । તથા કૌમારયૌવનસ્થવિરત્વાદયો
ભાવા અન્નપાનરસનિમિત્તા નિષ્પદ્યન્ત અતઃ કાર્યાશ્રયિણ ઉચ્યન્ત
અન્નાદિવિષયભોગનિમિત્તા જાયન્તે । નિમિત્તનૈમિત્તિકપ્રસઙ્ગેનેતિ
યદુક્તમત્રોચ્યતે ।

ધર્મેણ ગમનમૂર્ધ્વં ગમનમધસ્તાદ્ભવત્યધર્મેણ ।
જ્ઞાનેન ચાપવર્ગો વિપર્યયાદિષ્યતે બન્ધઃ ॥ ૪૪ ॥

ગૌડપાદભાષ્ય

ધર્મેણ ગમનમૂર્દ્ધ્વં ધર્મં નિમિત્તં કૃત્વોર્દ્ધ્વમુપનયતિ
ઊર્દ્ધ્વમિત્યષ્ટૌ સ્થાનાનિ ગૃહ્યન્તે । તદ્યથા । બ્રાહ્મં પ્રાજાપત્યં
સૌમ્યમૈન્દ્રં ગાન્ધર્વં રાક્ષસં પૈશાચમિતિ તત્ સૂક્ષ્મં શરીરં
ગચ્છતિ પશુમૃગપક્ષિસરીસૃપસ્થાવરાન્તેષ્વધર્મો નિમિત્તમ્ । કિંચ
જ્ઞાનેન ચાપવર્ગશ્ચ પઞ્ચવિંશતિતત્ત્વજ્ઞાનં તેન નિમિત્તેનાપવર્ગો
મોક્ષઃ તતઃ સૂક્ષ્મં શરીરં નિવર્તતે પરમાત્મા ઉચ્યતે । વિપર્યયાદિષ્યતે
બન્ધઃ અજ્ઞાનં નિમિત્તં સ ચૈષ નૈમિત્તિકઃ પ્રાકૃતો વૈકારિકો
દાક્ષિણિકશ્ચ બન્ધ ઇતિ વક્ષ્યતિ પુરસ્તાત્ યદિદમુક્તમ્ । 'પ્રાકૃતેન
ચ બન્ધેન તથા વૈકારિકેણ ચ । દક્ષિણાભિસ્તૃતીયેન બદ્ધો નાન્યેન
મુચ્યતે' ॥ તથાઽન્યદપિ નિમિત્તમ્ ।

વૈરાગ્યાત્પ્રકૃતિલયઃ સંસારો ભવતિ રાજસાદ્રાગાત્ ।
ઐશ્વર્યાદવિઘાતો વિપર્યયાત્તદ્વિપર્યાસઃ ॥ ૪૫॥

ગૌડપાદભાષ્ય

યથા કસ્યચિદ્વૈરાગ્યમસ્તિ ન તત્ત્વજ્ઞાનં તસ્માદજ્ઞાનપૂર્વાદ્વૈરાગ્યાત્
પ્રકૃતિલયો મૃતોઽષ્ટાસુ પ્રકૃતિષુ પ્રધાનબુદ્ધ્યહઙ્કારતન્માત્રેષુ
લીયતે ન મોક્ષઃ તતો ભૂયોઽપિ સંસરતિ । તથા યોઽયં રાજસો
રાગઃ યજામિ દક્ષિણાં દદામિ યેનામુષ્મિંલ્લોકેઽત્ર યદ્દિવ્યં માનુષં
સુખમનુભવામ્યેતસ્માદ્રાજસાદ્રાગાત્ સંસારો ભવતિ । તથા ઐશ્વર્યાદવિઘાતઃ
એતદૈશ્વર્યમષ્ટગુણમણિમાદિયુક્તં તસ્માદૈશ્વર્યનિમિત્તાદવિઘાતો
નૈમિત્તિકો ભવતિ બ્રાહ્માદિષુ સ્થાનેષ્વૈશ્વર્યં ન વિહન્યતે ।
કિંચાન્યદ્વિપર્યયાદ્વિપર્યાસઃ તસ્યાવિઘાતસ્તસ્ય વિપર્યાસો વિઘાતો
ભવત્યનૈશ્વર્યાત્ સર્વત્ર વિહન્યતે । કિંચાન્યદ્વિપર્યાદ્વિપર્યાસઃ
સ્યાવિઘાતસ્ય વિપર્યાસો વિઘાતો ભવત્યનૈશ્વર્યાત્ સર્વત્ર વિહન્યતે । એષ
નિમિત્તૈઃ સહ નૈમિત્તિકઃ ષોડશવિધો વ્યાખ્યાતઃ । સ કિમાત્મક ઇત્યાહ ।

એષ પ્રત્યયસર્ગો વિપર્યયાશક્તિતુષ્ટિસિદ્ધ્યાખ્યઃ ।
ગુણવૈષમ્યવિમર્દાત્ તસ્ય ભેદાસ્તુ પઞ્ચાશત્ ॥ ૪૬॥

ગૌડપાદભાષ્ય

યથા એષ ષોડશવિધો નિમિત્તનૈમિત્તભેદો વ્યાખ્યાત એષ પ્રત્યયસર્ગ
ઉચ્યતે । પ્રત્યયો બુદ્ધિરિત્યુક્તાઽધ્યવસાયો બુદ્ધિર્ધર્મો જ્ઞાનમિત્યાદિ સ

ચ પ્રત્યયસર્ગશ્ચતુર્ધા ભિદ્યતે વિપર્યયાશક્તિતુષ્ટિસિદ્ધાખ્યભેદાત્ । તત્ર સંશયોઽજ્ઞાનમ્ । યથા કસ્યચિત્ સ્થાણુદર્શને સ્થાણુરયં પુરુષો વેતિ સંશયઃ । અશક્તિર્યથા । તમેવ સ્થાણું સમ્યદ્દૃષ્ટ્વા સંશયં છેત્તું ન શક્નોતીત્યશક્તિઃ । એવં તૃતીયસ્તુષ્ટ્યાખ્યો યથા । તમેવ સ્થાણું જ્ઞાતું સંશયિતું વા નેચ્છતિ કિમનેનાસ્માકમિત્યેષા તુષ્ટિઃ । ચતુર્થઃ સિદ્ધાખ્યો યથા । આનન્દિતેન્દ્રિયઃ સ્થાણુમારૂઢાં વલ્લિં પશ્યતિ શકુનિં વા તસ્ય સિદ્ધિર્ભવતિ સ્થાણુરયમિતિ । એવમસ્ય ચતુર્વિધસ્ય પ્રત્યયસર્ગસ્ય ગુણવૈષમ્યવિમર્દ્દ તસ્ય ભેદાસ્તુ પઞ્ચાશત્ યોઽયં સત્ત્વરજસ્તમોગુણાનાં વૈષમ્યો વિમર્દ્દઃ તેન તસ્ય પ્રત્યયસર્ગસ્ય પઞ્ચાશદ્ભેદા ભવન્તિ તથા ક્વાપિ સત્ત્વમુત્કટં રજસ્તમસી ઉદાસીને ક્વાપિ રજઃ ક્વાપિ તમ ઇતિ ભેદાઃ કથ્યન્તે ।

પઞ્ચ વિપર્યયભેદા ભવન્ત્યશક્તેશ્ચ કરણવૈકલ્યાત્ ।
અષ્ટાવિંશતિભેદાસ્તુષ્ટિર્નવધાઽષ્ટધા સિદ્ધિઃ ॥ ૪૭॥

ગૌડપાદભાષ્ય

પઞ્ચ વિપર્યયભેદાસ્તે યથા તમો મોહો મહામોહસ્તામિસ્રોઽન્ધતામિસ્ર ઇત્યેષાં ભેદાનાં નાનાત્વં વક્ષ્યતેઽનન્તરમેવેતિ । અશક્તેસ્ત્વષ્ટાવિંશતિભેદા ભવન્તિ કરણવૈકલ્યાત્ તાનપિ વક્ષ્યામસ્તથા ચ તુષ્ટિર્નવધા ઊર્દ્ધ્વસ્રોતસિ રાજસાનિ જ્ઞાનાનિ । તથાષ્ટવિધા સિદ્ધિઃ સાત્ત્વિકાનિ જ્ઞાનાનિ તત્રૈવોર્દ્ધ્વસ્રોતસિ । એતત્ ક્રમેણૈવ વક્ષ્યન્તે તત્ર વિપર્યયભેદા ઉચ્યન્તે ।

ભેદસ્તમસોઽષ્ટવિધો મોહસ્ય ચ દશવિધો મહામોહઃ ।
તામિસ્રોઽષ્ટાદશધા તથા ભવત્યન્ધતામિસ્રઃ ॥ ૪૮॥

ગૌડપાદભાષ્ય

તમસસ્તાવદષ્ટધા ભેદઃ પ્રલયોઽજ્ઞાનાદ્વિભજ્યતે સોઽષ્ટાસુ પ્રકૃતિષુ લીયતે પ્રધાનબુદ્ધ્યહંકારપઞ્ચતન્માત્રાષ્ટાસુ તત્ર લીનમાત્માનં મન્યતે મુક્તોઽહમિતિ તમો ભેદ એષોઽષ્ટવિધસ્ય મોહસ્ય ભેદોઽષ્ટવિધ એવેત્યર્થઃ । યત્રાષ્ટગુણમણિમાદ્યૈશ્વર્યં તત્ર સંગાદિન્દ્રાદયો દેવા ન મોક્ષં પ્રાપ્નુવન્તિ પુનશ્ચ તત્ ક્ષયે સંસરન્ત્યેષોઽષ્ટવિધો મોહ ઇતિ । દશવિધો મહામોહઃ શબ્દસ્પર્શરૂપરસગન્ધા દેવાનામેતે પઞ્ચવિષયાઃ સુખલક્ષણાઃ માનુષાણામપ્યેતે એવ શબ્દાદયઃ પઞ્ચ વિષયા એવમેતેષુ

દશસુ મહામોહ ઇતિ । તામિસ્રોઽષ્ટદશધાઽષ્ટાવિધમૈશ્વર્યં
દૃષ્ટાનુશ્રવિકા વિષયા દશ એતેષામષ્ટાદશાનાં
સમ્પદમનુનન્દન્તિ વિપદં નાનુમોદન્ત્યેષોઽષ્ટાદશવિધો
વિકલ્પસ્તામિસ્રો । તથા તામિસ્રમષ્ટગુણમૈશ્વર્યં દૃષ્ટાનુશ્રવિકા
દશવિષયાસ્તથાન્ધતામિસ્રોઽપ્યષ્ટાદશભેદ એવ કિંતુ વિષયસમ્પત્તૌ
સમ્ભોગકાલે ય એવ મ્રિયતેઽષ્ટગુણૈશ્વર્યાદ્વા ભ્રશ્યતે તતસ્તસ્ય
મહદ્દુઃખમુત્પદ્યતે સોઽન્ધતામિસ્ર ઇતિ । એવં વિપર્યયભેદાસ્તમઃ
પ્રભૃતયઃ પઞ્ચ પ્રત્યેકં ભિદ્યમાના દ્વિષષ્ટિભેદાઃ સંવૃત્તા ઇતિ ।
અશક્તિભેદાઃ કથ્યન્તે ।

એકાદશેન્દ્રિયવધાઃ સહ બુદ્ધિવધૈરશક્તિરુદ્દિષ્ટા ।
સપ્તદશવધા બુદ્ધેર્વિપર્યયાત્તુષ્ટિસિદ્ધીનામ્ ॥ ૪૯॥

ગૌડપાદભાષ્ય

ભવન્ત્યશક્તેશ્ચ કરણવૈકલ્યાદષ્ટાવિંશતિભેદા ઇત્યુદ્દિષ્ટં
તત્રૈકાદશેન્દ્રિયવધાઃ બાધિર્યમન્ધતાપ્રસુપ્તિરુપઘ્રિકાઘ્રાણપાકો મૂકતા
કુણિત્વં ખાંજ્યં ક્લૈબ્યમુન્માદ ઇતિ । સહ બુદ્ધિવધૈરશક્તિરુદ્દિષ્ટા યે
બુદ્ધિવધાસ્તૈઃ સહાશક્તેરષ્ટાવિંશતિભેદા ભવન્તિ સપ્તદશવધા
બુદ્ધેઃ સપ્તદશવધાસ્તે તુષ્ટિભેદસિદ્ધિભેદવૈપરીત્યેન
તુષ્ટિભેદા નવ સિદ્ધિભેદા અષ્ટૌ યે તે વિપરીતૈઃ સહ એકાદશ વિધા
એવમષ્ટાવિંશતિવિકલ્પા અશક્તિરિતિ વિપર્યયાત્ સિદ્ધિતુષ્ટીનામેવ ભેદક્રમો
દ્રષ્ટવ્યઃ । તત્ર તુષ્ટિર્નવધા કથ્યતે ।

આધ્યાત્મિકાશ્ચતસ્રઃ પ્રકૃત્યુપાદાનકાલભાગ્યાખ્યાઃ ।
બાહ્યા વિષયોપરમાત્પઞ્ચ નવ ચ તુષ્ટયોઽભિહિતાઃ ॥ ૫૦॥

ગૌડપાદભાષ્ય

આધ્યાત્મિકાશ્ચતસ્રઃ તુષ્ટયોઽધ્યાત્મનિ ભવા આધ્યાત્મિકા તાશ્ચ
પ્રકૃત્યુપાદાનકાલભાગ્યાખ્યાઃ । તત્ર પ્રકૃત્યાખ્યા યથા કશ્ચિત્
પ્રકૃતિં વેત્તિ તસ્યાઃ સગુણનિર્ગુણત્વં ચ તેન તત્ત્વં તત્ કાર્યં
વિજ્ઞાયૈવ કેવલં તુષ્ટસ્તસ્ય નાસ્તિ મોક્ષ એષા પ્રકૃત્યાખ્યા ।
ઉપાદાનાખ્યા યથા કશ્ચિદવિજ્ઞાયૈવ તત્ત્વાન્યુપાદાનગ્રહણં કરોતિ
ત્રિદણ્ડકમણ્ડલુવિવિદિકાભ્યો મોક્ષ ઇતિ તસ્યાપિ નાસ્ત્યેષા ઉપાદાનાખ્યા ।
તથા કાલાખ્યા કાલેન મોક્ષો ભવિષ્યતીતિ કિં તત્ત્વાભ્યાસેનેત્યેષા

કાલાખ્યા તુષ્ટિસ્તસ્ય નાસ્તિ મોક્ષ ઇતિ । તથા ભાગ્યાખ્યા ભાગ્યેનૈવ મોક્ષો ભવિષ્યતીતિ ભાગ્યાખ્યા । ચતુર્દ્ધા તુષ્ટિરિતિ । બાહ્યાવિષયોપરમાચ્ચ પઞ્ચ । બાહ્યાસ્તુષ્ટયઃ પઞ્ચ વિષયોપરમાત્ શબ્દસ્પર્શરૂપરસગન્ધેભ્ય ઉપરતોઽર્જનરક્ષણક્ષયસંગહિંસાદર્શનાત્ । વૃદ્ધિનિમિત્તં પાશુપાલ્યવાણિજ્યપ્રતિગ્રહસેવાઃ કાર્યા એતદર્જનં દુઃખમર્જિતાનાં રક્ષણે દુઃખમુપભોગાત્ ક્ષીયત ઇતિ ક્ષયદુઃખમ્ । તથા વિષયોપભોગસંગે કૃતે નાસ્તીન્દ્રિયાણામુપશમ ઇતિ સંગદોષઃ । તથા ન અનુપહત્ય ભૂતાન્યુપભોગ ઇત્યેષ હિંસાદોષઃ । એવમર્જ્જનાદિદોષદર્શનાત્ પઞ્ચવિષયોપરમાત્ પઞ્ચ તુષ્ટયઃ । એવમાધ્યાત્મિકબાહ્યભેદાન્નવ તુષ્ટયસ્તાસાં નામાનિ શાસ્ત્રાન્તરે પ્રોક્તાનિ । અમ્ભઃ સલિલમોઘો વૃષ્ટિઃ સુતમો પારં સુનેત્રં નારીકમનુત્તમાંભસિકમિતિ । આસાં તુષ્ટીનાં વિપરીતાશક્તિભેદાદ્બુદ્ધિબધા ભવન્તિ । તદ્યથા અનમ્ભસોઽસલિલમનોઘ ઇત્યાદિવૈપરીત્યાદ્બુદ્ધિવધા ઇતિ । સિદ્ધિરુચ્યતે ।

ઊહઃ શબ્દોઽધ્યયનં દુઃખવિઘાતાસ્ત્રયં સુહૃત્પ્રાપ્તિઃ ।
દાનં ચ સિદ્ધયોઽષ્ટૌ સિદ્ધેઃ પૂર્વોઽઙ્કુશસ્ત્રિવિધઃ ॥ ૫૧॥

ઊહો યથા કશ્ચિન્નત્યમૂહતે કિમિહ સત્યં કિં પરં કિં નૈશ્રેયસં કિં કૃતાર્થઃ સ્યામિતિ ચિન્તયતો જ્ઞાનમુત્પદ્યતે પ્રધાનાદન્ય એવ પુરુષ ઇત્યન્યા બુદ્ધિરન્યોઽહંકારોઽન્યાનિ તન્માત્રાણીન્દ્રિયાણિ પઞ્ચમહાભૂતાનીત્યેવં તત્ત્વજ્ઞાનમુત્પદ્યતે યેન મોક્ષો ભવતિ એષા ઊહાખ્યા પ્રથમા સિદ્ધિઃ । તથા શબ્દજ્ઞાનાત્ પ્રધાનપુરુષબુદ્ધ્યહંકારતન્માત્રેન્દ્રિયપઞ્ચમહાભૂતવિષયં જ્ઞાનં ભવતિ તતો મોક્ષ ઇત્યેષા શબ્દાખ્યા સિદ્ધિઃ । અધ્યયનાદ્વેદાદિશાસ્ત્રાધ્યયનાત્ પઞ્ચવિંશતિતત્ત્વજ્ઞાનં પ્રાપ્ય મોક્ષં યાતિ ઇત્યેષા તૃતીયા સિદ્ધિઃ । દુઃખવિઘાતત્રયમાધ્યાત્મિકાધિભૌતિકાધિદૈવિકદુઃખત્રયવિઘાતાય ગુરું સમુપગમ્ય તત ઉપદેશાન્મોક્ષં યાત્યેષા ચતુર્થી સિદ્ધિઃ । એષૈવ દુઃખત્રયભેદાત્ ત્રિધા કલ્પનીયા ઇતિ ષટ્ સિદ્ધયઃ । તથા સુહૃત્પ્રાપ્તિર્યથા કશ્ચિત્ સુહૃત્ જ્ઞાનમધિગમ્ય મોક્ષં ગચ્છતિ એષા સપ્તમી સિદ્ધિઃ । દાનં યથા કશ્ચિદ્ભગવતાં પ્રત્યાશ્રયૌષધિત્રિદણ્ડકુણ્ડિકાદીનાં ગ્રાસાચ્છાદનાદીનાં ચ દાનેનોપકૃત્ય તેભ્યો જ્ઞાનમવાપ્ય મોક્ષં યાત્યેષાષ્ટમી સિદ્ધિઃ ।

આસામષ્ટાનાં સિધ્દીનાં શાસ્ત્રાન્તરે સંજ્ઞાઃ કૃતાસ્તારં સુતારં
તારતારં પ્રમોદં પ્રમુદિતં પ્રમોદમાનં રમ્યકં સદાપ્રમુદિતમિતિ ।
આસાં વિપર્યયાત્ બુદ્દેર્બન્ધા યે વિપરીતાસ્ત અશક્તૌ નિક્ષિમા
યથાઽતારમસુતારમતારતારમિત્યાદિદ્રષ્ટવ્યમશક્તિભેદા
અષ્ટાવિંશતિરુક્તાસ્તે સહ બુધ્દિબન્ધૈરેકાદશેન્દ્રિયબન્ધા ઇતિ । તત્ર
તુષ્ટિવિપર્યયા નવ સિધ્દીનાં વિપર્યયા અષ્ટૌ એવમેતે સમ્દશ બુધ્દિબન્ધા
એતૈઃ સહેન્દ્રિયબન્ધા અષ્ટાવિંશતિરશક્તિભેદાઃ પશ્ચાત્ કથિતા ઇતિ
વિપર્યયાશક્તિતુષ્ટિસિધ્દીનામેવોદ્દેશો નિર્દેશશ્ચ કૃત ઇતિ । કિં ચાન્યત્
સિધ્દેઃ પૂર્વોઽઙ્કુશસ્ત્રિવિધઃ સિધ્દેઃ પૂર્વા યા વિપર્યયાશક્તિતુષ્ટયસ્તા
એવ સિધ્દેરંકુશસ્તદ્ભેદાદેવં ત્રિવિધો યથા હસ્તી ગૃહીતાંકુશેન
વશો ભવત્યેવ વિપર્યયાશક્તિતુષ્ટિભિર્ગૃહીતો લોકોઽજ્ઞાનમાપ્નોતિ
તસ્માદેતાઃ પરિત્યજ્ય સિધ્દિઃ સેવ્યા સસિધ્દેસ્તત્ત્વજ્ઞાનમુત્પદ્યતે
તન્મોક્ષ ઇતિ । અથ યદુક્તં ભાવૈરધિવાસિતં લિંગં તત્ર ભાવા
ધર્માદયોઽષ્ટાવુક્તા બુધ્દિપરિણામા વિપર્યયાશક્તિતુષ્ટિસિધ્દિપરિણતાઃ સ
ભાવાખ્યઃ પ્રત્યયસર્ગઃ લિંગં ચ તન્માત્રસર્ગશ્ચતુર્દશભૂતપર્યન્ત
ઉક્તસ્તત્રૈકેનૈવ સર્ગેણ પુરુષાર્થસિધ્દૌ કિમુભયવિધસર્ગેણેત્યત આહ ।

ન વિના ભાવૈર્લિઙ્ગં ન વિના લિઙ્ગેન ભાવનિર્વૃત્તિઃ ।
લિઙ્ગાખ્યો ભાવાખ્યસ્તસ્માદ્વિવિધઃ પ્રવર્ત્તતે સર્ગઃ ॥ ૫૨ ॥

ગૌડપાદભાષ્ય

ભાવૈઃ પ્રત્યયસર્ગૈર્વિના લિંગં ન તન્માત્રસર્ગો ન
પૂર્વપૂર્વસંસ્કારાદૃષ્ટકારિતત્વાદુત્તરોત્તરદેહલમ્ભસ્ય
લિંગેન તન્માત્રસર્ગેણ ચ વિના ભાવનિર્વૃત્તિર્ન
સ્થૂલસૂક્ષ્મદેહસાધ્યત્વાધ્દર્માદિરનાદિત્વાચ્ચ સર્ગસ્ય
બીજાંકુરાવન્યોન્યાશ્રયૌ ન દોષાય તત્તજ્જાતીયાપેક્ષિતત્વેઽપિ તત્તદ્વ્યક્તીનાં
પરસ્પરાનપેક્ષિત્વાત્તસ્માદ્ભાવાખ્યો લિંગાખ્યશ્ચ દ્વિવિધઃ પ્રવર્ત્તતે
સર્ગ ઇતિ કિં ચાન્યત્ ।

અષ્ટવિકલ્પો દૈવસ્તૈર્યગ્યોનશ્ચ પઞ્ચધા ભવતિ।
માનુષ્યશ્ચૈકવિધઃ સમાસતો ભૌતિકઃ સર્ગઃ ॥ ૫૩ ॥

ગૌડપાદભાષ્ય

તત્ર દૈવમષ્ટપ્રકારં બ્રાહ્મં પ્રાજાપત્યં સૌમ્યમૈન્દ્રં ગાન્ધર્વં યાક્ષં

રાક્ષસં પૈશાચમિતિ । પશુમૃગપક્ષિસરીસૃપસ્થાવરાણિ ભૂતાન્યેવ પઞ્ચવિધસ્તૈરશ્ચ । માનુષયોનિરેકૈવ ઇતિ ચતુર્દશભૂતાનિ ત્રિષ્વપિ લોકેષુ ગુણત્રયમસ્તિ તત્ર કસ્મિન્ કિમધિકમુચ્યતે ।

ઊર્ધ્વં સત્ત્વવિશાલસ્તમોવિશાલશ્ચ મૂલતઃ સર્ગઃ ।
મધ્યે રજોવિશાલો બ્રહ્માદિસ્તમ્બપર્યન્તઃ ॥ ૫૪॥

ગૌડપાદભાષ્ય

ઊર્દ્ધ્વમિત્યષ્ટસુ દેવસ્થાનેષુ સત્ત્વવિશાલં સત્ત્વવિસ્તારઃ સત્ત્વોત્કટ ઊર્દ્ધ્વસત્ત્વ ઇતિ । તત્રાપિ રજસ્તમસી સ્તઃ । તમોવિશાલો મૂલતઃ પશ્વાદિષુ સ્થાવરાન્તેષુ સર્વઃસર્ગસ્તમસાધિક્યેન વ્યાપ્તસ્તત્રાપિ સત્ત્વરજસી સ્તઃ । મધ્યે માનુષ્યે રજ ઉત્કટં તત્રાપિ સત્ત્વતમસી વિદ્યેતે તસ્માદ્દુઃખપ્રાયા મનુષ્યાઃ । એવં બ્રહ્માદિસ્તમ્બપર્યન્તઃ બ્રહ્માદિસ્થાવરાન્તઃ ઇત્યર્થઃ । એવમભૌતિકઃ સર્ગો લિંગસર્ગો ભાવસર્ગો ભૂતસર્ગો દૈવમાનુષતૈર્યગ્યોનય ઇત્યેષઃ પ્રધાનકૃતઃ ષોડશઃ સર્ગઃ ।

તત્ર જરામરણકૃતં દુઃખં પ્રાપ્નોતિ ચેતનઃ પુરુષઃ ।
લિઙ્ગસ્યાવિનિવૃત્તેસ્તસ્માદ્દુઃખં સમાસેન ॥ ૫૫॥

ગૌડપાદભાષ્ય

તત્રેતિ તેષુ દેવમાનુષતિર્યગ્યોનિષુ જરાકૃતં મરણકૃતં ચૈવ દુઃખં ચેતનઃ ચૈતન્યવાન્ પુરુષઃ પ્રાપ્નોતિ ન પ્રધાનં ન બુદ્ધિર્નાહંકારો ન તન્માત્રાણીન્દ્રિયાણિ મહાભૂતાનિ ચ । કિયન્તં કાલં પુરુષો દુઃખં પ્રાપ્નોતીતિ તદ્વિવિનક્તિ । લિંગસ્યાવિનિવૃત્તેર્યત્તન્મહદાદિ લિંગશરીરેણાવિશ્ય તત્ર વ્યક્તીભવતિ તદ્યાવન્નિવર્ત્તતે સંસારશરીરમિતિ સંક્ષેપેણ ત્રિષુ સ્થાનેષુ પુરુષો જરામરણકૃતં દુઃખં પ્રાપ્નોતિ લિંગસ્યાવિનિવૃત્તેઃ લિંગસ્ય વિનિવૃત્તિં યાવત્ । લિંગનિવૃત્તૌ મોક્ષો મોક્ષપ્રાપ્તૌ નાસ્તિ દુઃખમિતિ । તત્પુનઃ કેન નિવર્ત્તતે યદા પઞ્ચવિંશતિતત્ત્વજ્ઞાનં સ્યાત્ સત્ત્વપુરુષાન્યથાખ્યાતિલક્ષણમિદં પ્રધાનમિયં બુદ્ધિરયમહંકાર ઇમાનિ પઞ્ચતન્માત્રાણ્યેકાદશેન્દ્રિયાણિ પઞ્ચ મહાભૂતાનિ યેભ્યોઽન્યઃ પુરુષો વિસદૃશ ઇત્યેવં જ્ઞાનાલ્લિંગનિવૃત્તિસ્તતો મોક્ષ ઇતિ । પ્રવૃત્તેઃ કિં નિમિત્તમારભ્ય ઇત્યુચ્યતે ।

ઇત્યેષ પ્રકૃતિકૃતો મહદાદિવિષયભૂતપર્યન્તઃ ।
પ્રતિપુરુષવિમોક્ષાર્થં સ્વાર્થ ઇવ પરાર્થ આરમ્ભઃ ॥ ૫૬॥

ગૌડપાદભાષ્ય

ઇત્યેષ પરિસમાપ્તૌ નિર્દ્દેશે ચ પ્રકૃતિવિકૃતૌ પ્રકૃતિકરણે
પ્રકૃતિક્રિયાયાં ય આરમ્ભો મહદાદિવિશેષભૂતપર્યન્તઃ
પ્રકૃતેર્મહાન્ મહતોઽહંકારસ્તસ્માત્તન્માત્રાણ્યેકાદશેન્દ્રિયાણિ
તન્માત્રેભ્યઃ પઞ્ચમહાભૂતાનીત્યેષઃ પ્રતિપુરુષવિમોક્ષાર્થં
પુરુષં પ્રતિ દેવમનુષ્યતિર્યગ્ભાવં ગતાનાં વિમોક્ષાર્થમારમ્ભઃ
કથં સ્વાર્થ ઇવ પરાર્થમારમ્ભઃ યથા કશ્ચિત્ સ્વાર્થં ત્યક્ત્વા
મિત્રકાર્યાણિ કરોતિ એવં પ્રધાનમ્ । પુરુષોઽત્ર પ્રધાનસ્ય ન કિઞ્ચિત્
પ્રત્યુપકારં કરોતિ । સ્વાર્થ ઇવ ન ચ સ્વાથઃ પરાર્થ એવાર્થઃ
શબ્દાદિવિષયોપલબ્ધિર્ગુણપુરુષાન્તરોપલબ્ધિશ્ચ ત્રિષુ લોકેષુ
શબ્દાદિવિષયૈઃ પુરુષા યોજયિતવ્યા અન્તે ચ મોક્ષેણેતિ પ્રધાનસ્ય
પ્રવૃત્તિસ્તથા ચોક્તમ્ । કુમ્ભવત્ પ્રધાનં પુરુષાર્થં કૃત્વા
નિવર્ત્તત ઇતિ । અત્રોચ્યતેઽચેતનં પ્રધાનં ચેતનઃ પુરુષ ઇતિ મયા
ત્રિષુ લોકેષુ શબ્દાદિભિર્વિષયૈઃ પુરુષો યોજ્યોઽન્તે મોક્ષઃ કર્ત્તવ્ય ઇતિ
કથં ચેતનવત્ પ્રવૃતિઃ । સત્યં કિંત્વચેતનાનામપિ પ્રવૃત્તિર્દૃષ્ટા
નિવૃત્તિશ્ચ યસ્માદિત્યાહ ।

વત્સવિવૃદ્ધિનિમિત્તં ક્ષીરસ્ય યથા પ્રવૃત્તિરજ્ઞસ્ય ।
પુરુષવિમોક્ષનિમિત્તં તથા પ્રવૃત્તિઃ પ્રધાનસ્ય ॥ ૫૭॥

ગૌડપાદભાષ્ય

યથા તૃણાદિકં ગવા ભક્ષિતં ક્ષીરભાવેન પરિણમ્ય વત્સવિવૃદ્ધિં
કરોતિ પુષ્ટે ચ વત્સે નિવર્ત્તત એવં પુરુષવિમોક્ષનિમિત્તં પ્રધાનમ્ ।
અજ્ઞસ્ય પ્રવૃત્તિરિત । કિંચ ।

ઔત્સુક્યનિવૃત્ત્યર્થં યથા ક્રિયાસુ પ્રવર્તતે લોકઃ।
પુરુષસ્ય વિમોક્ષાર્થં પ્રવર્તતે તદ્વદવ્યક્તમ્ ॥ ૫૮॥

ગૌડપાદભાષ્ય

યથા લોક ઇત્યૌસ્તુક્યે સતિ તસ્ય નિવૃત્ત્યર્થં ક્રિયાસુ પ્રવર્ત્તતે
ગમનાગમનક્રિયાસુ કૃતકાર્યો નિવર્ત્તતે તથા પુરુષસ્ય વિમોક્ષાર્થં
શબ્દાદિવિષયોપભોગોપલબ્ધિલક્ષણં ગુણપુરુષાન્તરોપલબ્ધિલક્ષણં
ચ દ્વિવિધમપિ પુરુષાર્થં કૃત્વા પ્રધાનં નિવર્તતે । કિં ચાન્યત્ ।

રઙ્ગસ્ય દર્શયિત્વા નિવર્તતે નર્તકી યથા નૃત્યાત્ ।
પુરુષસ્ય તથાત્માનં પ્રકાશ્ય નિવર્તતે પ્રકૃતિઃ ॥ ૫૯॥

ગૌડપાદભાષ્ય

યથા નર્ત્તકી શૃઙ્ગારાદિરસૌરિતિહાસાદિભાવૈશ્ચ
નિબદ્ધગીતવાદિત્રવૃત્તાનિ રઙ્ગસ્ય દર્શયિત્વા કૃતકાર્યા
નૃત્યાન્નિવર્ત્તતે તથા પ્રકૃતિરપિ પુરુષસ્યાત્માનં પ્રકાશ્ય
બુદ્ધ્યહંકારતન્માત્રેન્દ્રિયમહાભૂતભેદેન નિવર્તતે । કથં કો વા
સ્યાન્નિવર્ત્તકો હેતુસ્તદાહ ।

નાનાવિધૈરુપાયૈરુપકારિણ્યનુપકારિણઃ પુંસઃ।
ગુણવત્યગુણસ્ય સતસ્તસ્યાર્થમપાર્થકં ચરતિ ॥ ૬૦॥

ગૌડપાદભાષ્ય

નાનાવિધૈરુપાયૈઃ પ્રકૃતિઃ પુરુષસ્યોપકારિણ્યનુપકારિણઃ પુંસઃ કથં
દેવમાનુષતિર્યગ્ભાવેન સુખદુઃખમોહાત્મકભાવેન શબ્દાદિવિષયભાવેન
એવં નાનાવિધૈરુપાયૈરાત્માનં પ્રકાશ્યાહમન્યા ત્વમન્ય ઇતિ નિવર્ત્તતેઽતો
નિત્યસ્ય તસ્યાર્થમપાર્થં કુરુતે ચરતિ ચ યથા કશ્ચિત્ પરોપકારી
સર્વસ્યોપકુરુતે નાત્મનઃ પ્રત્યુપકારમીહત એવં પ્રકૃતિઃ પુરુષાર્થં
કુરુતે કરોત્યપાર્થકમ્ । પશ્ચાદુક્તમાત્માનં પ્રકાશ્ય નિવર્ત્તતે નિવૃત્ત
ચ કિં કરોતીત્યાહ ।

પ્રકૃતેઃ સુકુમારતરં ન કિઞ્ચિદસ્તીતિ મે મતિર્ભવતિ ।
યા દૃષ્ટાસ્મીતિ પુનર્ન દર્શનમુપૈતિ પુરુષસ્ય ॥ ૬૧॥

ગૌડપાદભાષ્ય

લોકે પ્રકૃતેઃ સુકુમારતરં ન કિઞ્ચિદસ્તીત્યેવં મે મતિર્ભવતિ યેન
પરાર્થ એવં મતિરુત્પન્ના કસ્માદહમનેન પુરુષેણ દૃષ્ટાસ્મીત્યસ્ય
પુંસો પુનર્દર્શનં નોપૈતિ પુરુષસ્યાદર્શનમુપયાતીત્યર્થઃ । તત્ર
સુકુમારતરં વર્ણયતિ । ઈશ્વરં કારણં બ્રુવતે । "અજો જન્તુરનીશોઽયમાત્મા
નઃ સુખદુઃખયોરીશ્વરપ્રેરિતો ગચ્છેત્ સ્વર્ગં નરકમેવ વા ॥" અપરે
સ્વભાવકારણિકાં બ્રુવતે । કેન શુક્લીકૃતા હંસા મયૂરાઃ કેન ચિત્રિતાઃ ।
સ્વભાવેનૈવેતિ । અત્ર સાંખ્યાચાર્યા આહુઃ નિર્ગુણત્વાદીશ્વરસ્ય કથં

સગુણતઃ પ્રજા જાયેરન્ કથં વા પુરુષાન્નિર્ગુણાદેવ તસ્માત્ પ્રકૃતેર્યુજ્યતે યથા શુક્લેભ્યસ્તન્તુભ્યઃ શુક્લ એવ પટો ભવતિ કૃષ્ણેભ્યઃ કૃષ્ણ એવેતિ । એવં ત્રિગુણાત્ પ્રધાનાત્ ત્રયો લોકાસ્ત્રિગુણાઃ સમુત્પન્ના ઇતિ ગમ્યતે । નિર્ગુણ ઈશ્વરઃ સગુણાનાં લોકાનાં તસ્માદુત્પત્તિરયુક્તેતિ । અનેન પુરુષો વ્યાખ્યાતઃ । તથા કેષાંચિત્ કાલઃ કારણમિત્યુક્તં ચ । "કાલઃ પઞ્ચાસ્તિ ભૂતાનિ કાલઃ સંહરતે જગત્ । કાલઃ સુપ્તેષુ જાગર્ત્તિ કાલો હિ દુરતિક્રમઃ ॥" વ્યક્તમવ્યક્તપુરુષાસ્ત્રયઃ પદાર્થાસ્તેન કાલોઽન્તર્ભૂતોઽસ્તિ સ વ્યક્તઃ સર્વકર્તૃત્વાત્ કાલસ્યાપિ પ્રધાનમેવ કારણં સ્વભાવોઽપ્યત્રૈવ લીનઃ તસ્માત્ કાલો ન કારણમ્ । નાપિ સ્વભાવ ઇતિ । તસ્માત્ પ્રકૃતિરેવ કારણં ન પ્રકૃતેઃ કારણાન્તરમસ્તીતિ । ન પુનર્દર્શનમુપયાતિ પુરુષસ્ય । અતઃ પ્રકૃતેઃ સુકુમારતરં સુભોગ્યતરં ન કિઞ્ચિદીશ્વરાદિકારણમસ્તીતિ મે મતિર્ભવતિ । તથા ચ શ્લોકે રૂઢમ્ । પુરુષો મુક્તઃ પુરુષઃ સંસારીતિ ચોદિતેત્યાહ ।

તસ્માન્ન બધ્યતે નાપિ મુચ્યતે નાપિ સંસરતિ કશ્ચિત્ ।
સંસરતિ બધ્યતે મુચ્યતે ચ નાનાશ્રયા પ્રકૃતિઃ ॥ ૬૨॥

ગૌડપાદભાષ્ય

તસ્માત્ કારણાત્ પુરુષો ન બધ્યતે નાપિ મુચ્યતે નાપિ સંસરતિ યસ્માત્ કારણાત્ પ્રકૃતિરેવ નાનાશ્રયા દૈવમાનુષતિર્યગ્યોન્યાશ્રયા બુદ્ધ્યહંકારતન્માત્રેન્દ્રિયભૂતસ્વરૂપેણ બધ્યતે મુચ્યતે સંસરતિ ચેતિ । અથ મુક્ત એવ સ્વભાવાત્ સ સર્વગતશ્ચ કથં સંસરત્યપ્રાપ્તપ્રાપણાર્થં સંસરણમિતિ તેન પુરુષો બધ્યતે પુરુષો મુચ્યતે સંસરતિ વ્યપદિશ્યતે યેન સંસારિત્વં ન વિદ્યતે સત્ત્વપુરુષાન્તજ્ઞાનાત્ તત્ત્વં પુરુષસ્યાભિવ્યજ્યતે । તદભિવ્યક્તો કેવલઃ શુદ્ધો મુક્તઃ સ્વરૂપપ્રતિષ્ઠઃ પુરુષ ઇતિ । અત્ર યદિ પુરુષસ્ય બન્ધો નસ્તિ તતો મોક્ષોઽપિ નાસ્તિ । અત્રોચ્યતે પ્રકૃતિરેવાત્માનં બધ્નાતિ મોચયતિ ચ યત્ર સૂક્ષ્મશરીરં તન્માત્રકં ત્રિવિધકરણોપેતં તત્ ત્રિવિધેન બન્ધેન બધ્યતે । ઉક્તં ચ પ્રાકૃતેન ચ બન્ધેન તથા વૈકારિકેણ ચ । દાક્ષિણેન તૃતીયેન બદ્ધો નાન્યેન મુચ્યતે । તત્ સૂક્ષ્મં શરીરં ધર્માધર્મ સંયુક્તમ્ । પ્રકૃતિશ્ચ બધ્યતે પ્રકૃતિશ્ચ મુચ્યતે સંસરતીતિ કથં તદુચ્યતે ।

રૂપૈઃ સપ્તભિરેવં બધ્નાત્યાત્માનમાત્મના પ્રકૃતિઃ ।

સૈવ ચ પુરુષસ્યાર્થં પ્રતિ વિમોચયત્યેકરૂપેણ ॥ ૬૩॥

ગૌડપાદભાષ્ય

રૂપૈઃ સપ્તભિરેવૈતાનિ સપ્ત પ્રોચ્યન્તે ધર્મો વૈરાગ્યમૈશ્વર્યમધર્મોઽજ્ઞાનમવૈરાગ્યમનૈશ્વર્યમેતાનિ પ્રકૃતેઃ સપ્તરૂપાણિ તૈરાત્માનં સ્વં બધ્નાતિ પ્રકૃતિરાત્માનં સ્વમેવ સૈવ પ્રકૃતિઃ પુરુષસ્યાર્થઃ પુરુષાર્થઃ કર્ત્તવ્ય ઇતિ વિમોચયત્યાત્માનમેકરૂપેણ જ્ઞાનેન । કથં તજ્જ્ઞાનમુત્પદ્યતે ।

એવં તત્ત્વાભ્યાસાન્નાસ્મિ ન મે નાહમિત્યપરિશેષમ્ ।
અવિપર્યયાદ્વિશુદ્ધં કેવલમુત્પદ્યતે જ્ઞાનમ્॥ ૬૪॥

ગૌડપાદભાષ્ય

એવમુક્તેન ક્રમેન પઞ્ચવિંશતિતત્ત્વાલોચનાભ્યાસાદિયં પ્રકૃતિરયં પુરુષ એતાનિ પઞ્ચતન્માત્રેન્દ્રિયમહાભૂતાનીતિ પુરુષસ્ય જ્ઞાનમુત્પદ્યતે નાસ્તિ નાહમેવ ભવામિ ન મે મમ શરીરં તદ્યતોઽહમન્યઃ શરીરમન્યન્નાહમિત્યપરિશેષમહંકારરહિતમપરિશેષમવિપર્યયાદ્વિશુદ્ધં વિપર્યયઃ સંશયોઽવિપર્યયાદસંશયાદ્વિશુદ્ધં કેવલં તદેવ નાન્યદસ્તીતિ મોક્ષકારણમુત્પદ્યતેઽભિવ્યજ્યતે જ્ઞાનં પઞ્ચવિંશતિતત્ત્વજ્ઞાનં પુરુષસ્યેતિ । જ્ઞાને પુરુષઃ કિં કરોતિ ।

તેન નિવૃત્તપ્રસવામર્થવશાત્સપ્તરૂપવિનિવૃત્તામ્।
પ્રકૃતિં પશ્યતિ પુરુષઃ પ્રેક્ષકવદવસ્થિતઃ સ્વસ્થઃ ॥ ૬૫॥

ગૌડપાદભાષ્ય

તેન વિશુદ્ધેન કેવલજ્ઞાનેન પુરુષઃ પ્રકૃતિં પશ્યતિ પ્રેક્ષકવત્ પ્રેક્ષકેણ તુલ્યમવસ્થિતઃ સ્વસ્થો યથા રંગપ્રેક્ષકોઽવસ્થિતો નર્ત્તકીં પશ્યતિઃ સ્વસ્થઃ સ્વસ્મિંસ્તિષ્ઠતિ સ્વસ્થઃ સ્વસ્થાનસ્થિતઃ । કથંભૂતાં પ્રકૃતિં નિવૃત્તપ્રસવાં નિવૃત્તઃ બુદ્ધ્યહંકારકાર્યાનર્થવશાત્ સપ્તરૂપવિનિવૃત્તાં નિવર્ત્તિતોભયપુરુષપ્રયોજનવશાદ્યૈઃ સપ્તભી રૂપૈર્ધર્માદિભિરાત્માનં બધ્નાતિ તેભ્યઃ સપ્તભ્યો રૂપેભ્યો વિનિવૃત્તિં પ્રકૃતિં પશ્યતિ । કિં ચ ।

દૃષ્ટા મયેત્યુપેક્ષક એકો દૃષ્ટાહમિત્યુપરમત્યન્યા ।
સતિ સંયોગેઽપિ તયોઃ પ્રયોજનં નાસ્તિ સર્ગસ્ય ॥ ૬૬॥

ગૌડપાદભાષ્ય

રંગસ્થ ઇતિ યથા રંગસ્થ ઇત્યેવમુપેક્ષક એકઃ કેવલઃ શુદ્ધઃ પુરુષસ્તેનાહં દૃષ્ટેતિ કૃત્વા ઉપરતા નિવૃતા એકા એકૈવ પ્રકૃતિઃ ત્રૈલોક્યસ્યાપિ પ્રધાનકારણભૂતા ન દ્વિતીયા પ્રકૃતિરસ્તિ મૂર્ત્તિભેદે જાતિભેદાદેવં પ્રકૃતિપુરુષયોર્નિર્વૃત્તાવપિ વ્યાપકત્વાત્ સંયોગોઽસ્તિ ન તુ સંયોગાત્ કુતઃ સર્ગો ભવતિ । સતિ સંયોગેઽપિ તયોઃ પ્રકૃતિપુરુષયોઃ સર્વગતત્વાત્ સત્યપિ સંયોગે પ્રયોજનં નાસ્તિ સર્ગસ્ય સૃષ્ટેશ્ચરિતાર્થત્વાત્ પ્રકૃતેર્દ્વિવિધં પ્રયોજનં શબ્દવિષયોપલબ્ધિર્ગુણપુરુષાન્તરોપલબ્ધિશ્ચ । ઉભયત્રાપિ ચરિતાર્થત્વાત્ સર્ગસ્ય નાસ્તિ પ્રયોજનં યઃ પુનઃ સર્ગ ઇતિ । યથા દાનગ્રહણનિમિત્ત ઉત્તમર્ણાધમર્ણયોર્દ્રવ્યવિશુદ્ધૌ સત્યપિ સંયોગે ન કશ્ચિદર્થસમ્બન્ધો ભવતિ । એવં પ્રકૃતિપુરુષયોરપિ નાસ્તિ પ્રયોજનમિતિ । યદિ પુરુષસ્યોત્પન્ને જ્ઞાને મોક્ષો ભાતિ તતો મમ કસ્માન્ન ભવતીતિ । અત ઉચ્યતે ।

સમ્યગ્જ્ઞાનાધિગમાદ્ધર્માદીનામકારણપ્રાપ્તૌ ।
તિષ્ઠતિ સંસ્કારવશાચ્ચક્રભ્રમવદ્ધૃતશરીરઃ ॥ ૬૭॥

ગૌડપાદભાષ્ય

યદ્યપિ પઞ્ચવિંશતિતત્ત્વજ્ઞાનં સમ્યક્ જ્ઞાનં ભવતિ તથાઽપિ સંસ્કારવશાદ્ધૃતશરીરો યોગી તિષ્ઠતિ કથં ચક્રભ્રમવચ્ચક્રભ્રમેણ તુલ્યં યથા કુલાલશ્ચક્રં ભ્રમયિત્વા ઘટં કરોતિ મૃત્પિણ્ડં ચક્રમારોપ્ય પુનઃ કૃત્વા ઘટં પર્યામુઞ્ચતિ ચક્રં ભ્રમત્યેવ સંસ્કારવશાદેવં સમ્યગ્જ્ઞાનાધિગમાદુત્પન્નસમ્યગ્જ્ઞાનસ્ય ધર્માદીનામકારણપ્રાપ્તૌ એતાનિ સપ્ત રૂપાણિ બન્ધનભૂતાનિ સમ્યગ્જ્ઞાનેન દગ્ધાનિ યથા નાગ્નિના દગ્ધાનિ બીજાનિ પ્રરોહણસમર્થાન્યેવમેતાનિ ધર્માદીનિ બન્ધનાનિ ન સમર્થાનિ । ધર્માદીનામકારણપ્રાપ્તૌ સંસ્કારવશાદ્ધૃતશરીરાસ્તિષ્ઠતિ જ્ઞાનાદ્વર્ત્તમાનધર્માધર્મક્ષયઃ કસ્માન્ન ભવતિ વર્ત્તમાનત્વાદેવ ક્ષણાન્તરે ક્ષયમપ્યેતિ જ્ઞાનં ત્વનાગતકર્મ દહતિ વર્ત્તમાનશરીરેણ ચ યત્ કરોતિ તદપીતિ વિહિતાનુષ્ઠાનકરણાદિતિ સંસ્કારક્ષયાચ્છરીરપાતે મોક્ષઃ । સ કિંવિશિષ્ટો ભવતીત્યુચ્યતે ।

પ્રાપ્તે શરીરભેદે ચરિતાર્થત્વાત્પ્રધાનવિનિવૃત્તૌ ।
ઐકાન્તિકમાત્યન્તિકમુભયં કૈવલ્યમાપ્નોતિ ॥ ૬૮॥

ગૌડપાદભાષ્ય

ધર્માધર્મજનિતસંસ્કારક્ષયાત્ પ્રાપ્તે શરીરભેદે ચરિતાર્થત્વાત્
પ્રધાનસ્ય નિવૃત્તૌ ઐકાન્તિકમવશ્યમાત્યન્તિકમનન્તર્હિતં કૈવલ્યં
કેવલભાવાન્મોક્ષ ઉભયમૈકાન્તિકાત્યન્તિકમિત્યેવ વિશિષ્ટકૈવલ્યમાપ્નોતિ ।

પુરુષાર્થજ્ઞાનમિદં ગુહ્યં પરમર્ષિણા સમાખ્યાતમ્।
સ્થિત્યુત્પત્તિપ્રલયાશ્ચિન્ત્યન્તે યત્ર ભૂતાનામ્ ॥ ૬૯॥

ગૌડપાદભાષ્ય

પુરુષાર્થો મોક્ષસ્તદર્થં જ્ઞાનમિદં ગુહ્યં રહસ્યં પરમર્ષિણા
શ્રીકપિલર્ષિણા સમાખ્યાતં સમ્યગુક્તં યત્ર જ્ઞાને ભૂતાનાં વૈકારિકાણાં
સ્થિત્યુત્પત્તિપ્રલયા અવસ્થાનાવિર્ભાવતિરોભાવાશ્ચિન્ત્યન્તે વિચાર્યન્તે યેષાં
વિચારાત્ સમ્યક્ પઞ્ચવિંશતિતત્ત્વવિવેચનાત્મિકા સમ્પદ્યતે સંવિત્તિરિતિ
સાંખ્યં કપિલમુનિના પ્રોક્તં સંસારવિમુક્તિકારણં હિ।
યત્રૈતાઃ સપ્તતિરાર્યા ભાષ્યં ચાત્ર ગૌડપાદકૃતમ્ ॥

એતત્પવિત્રમગ્ર્યં મુનિરાસુરયેઽનુકમ્પયા પ્રદદૌ ।
આસુરિરપિ પઞ્ચશિખાય તેન ચ બહુલીકૃતં તન્ત્રમ્ ॥ ૭૦॥

શિષ્યપરમ્પરયાગતમીશ્વરકૃષ્ણેન ચૈતદાર્યાભિઃ ।
સઙ્ક્ષિપ્તમાર્યમતિના સમ્યગ્વિજ્ઞાય સિદ્ધાન્તમ્ ॥ ૭૧॥

સપ્તત્યાં કિલ યોઽર્થાસ્તેઽર્થાઃ કૃત્સ્નસ્ય ષષ્ટિતન્ત્રસ્ય।
આખ્યાયિકાવિરહિતાઃ પરવાદવિવર્જિતાશ્ચેતિ ॥ ૭૨॥

Eન્ચોદેદ્ અન્દ્ પ્રૂફ઼્રેઅદ્ બ્ય્ ઢવલ્ Pઅતેલ્ દ્ર્ધવલ્ર૭૮પ અત્ ગ્મૈલ્ ઼્ઓમ્

---

*sA NkhyakArikA with gauDapAdabhAShya*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*